In Public domain. Digitization Muthulakshmi Research Academy

155 155 (79)

892 । शिवामृतसारसमुच्चयः ॥

शिवमहिमाकथनम्	P. 1-3
हरिहरयोरद्वैतकथनम्	„ 4-6
शिवभक्तिकथनम्	„ 6-7
भक्तगतिकथनम्	„ 7-
यात्राकथनम्	„ 8-
दर्शनफलकथनम्	„ 8-9
स्पर्शनकथनम्	„ 9-
प्रदोषफलकथनम्	„ 9-11
कीर्तनफलम्	„ 11-12
स्मरणफलम्	„ 12-13
दीक्षाफलम्	„ 13-
पूजालिङ्गकथनम्	„ 13-
लिङ्गपूजाकथनम्	„ 14-15
पूजाफलमाह	„ 15-17
पुण्यकालार्चनफलकथनम्	„ 17-18
स्नपनफलकथनम्	„ 18-21
नृत्तगीतफलकथनम्	„ 21-22
अर्घ्यदानविधिः	„ 22-23
चन्दनादिलेपनफलकथनम्	„ 23-24
सकलकुसुमदानफलकथनम्	„ 24-29
धूपदानफलम्	„ 29-30
दीपदानफलम्	„ 30-31
नैवेद्यफलम्	„ 31-33
प्राणायामध्यानकथनम्	„ 33-34
जपमालाकथनम्	„ 34-36
प्रदक्षिणफलकथनम्	„ 36-37
दण्डप्रणामफलकथनम्	„ 37-38
विद्यादिदानफलकथनम्	„ 38-44
चतुर्दश्याद्युपवासफलकथनम्	„ 44-50
अपवर्गादिफलकथनम्	„ 51-52

In Public domain. Digitization Muthulakshmi Research Academy

~~[illegible]~~ आयतननिर्माणफलम् p52-53
लिङ्गस्थापनफलकथनम् " 53-54
गोत्रतीर्थफलकथनम् " 54-56

In Public domain. Digitization Muthulakshmi Research Academy

155 155 2

~~[illegible]~~ आयतननिर्माणफलम् p52-53
लिङ्गस्थापनफलकथनम् " 53-54
तीर्थफलकथनम् " 54-56

In Public domain. Digitization Muthulakshmi Research Academy

T.No.892

॥ शिवामृतसारसमुच्चयः ॥

श्री:॥ नमोऽस्तु सिन्धुजन्मांश निर्धूतामल मौलये।
श्रुति शब्दाग्रसंसक्त सत्त्व सत्त्वाय शम्भवे ॥

स्थाणुः लाभफलं ददाति विलसद्भूति र्विभाति दिश
न्ते शान्तज्वालितानन: प्रशमयंस्तापत्रयं व्यापदम्।
उग्र: स्पष्ट विभक्तिभावहृदयं यद्वै शिवं प्राणिनां
दुर्भिक्षाद्भुत भैरव: स भगवान् विश्वेऽस्तु निःश्रेयसे॥

राज्ये गौडमहीभुजां समभवच्छ्रो शाधिकारी पर:
पात्राणां कुलदेव इत्यु पाचितो भूलोककल्पद्रुम:।
तस्माद्गौतम वामदेव तनयो लेभे पदं पैत्र्यकं
जज्ञे भूतनिरंकुश: शिवपर: श्री शोभिदेवस्तत:॥

भारत पुराण रामायण पाशुपतादि तन्त्रवचनानि।
तस्माद्भ्या कृपतेनेशित: शिवामृतसारसमुच्चयोऽयम्—

आद्यं प्रवक्ष्ये महिमानमैश्वरं
अद्वैतके केशव शाङ्करं तथा।
ततो स भक्तिं प्रति इष्टदायिनीं
यां लां प्रवक्ष्यामि समासतस्तत:॥

2 दर्शनमथ वक्ष्ये स्पर्शनमथ ... ऐश्वरं वै
प्रदोषफलमशेषं कीर्तनं तस्य पुण्यम्।
स्मर(ण)मपि च वक्ष्ये पापराश्या धनाग्निं
हर निकेतनदत्तं सद्य सम्मार्जनस्य ॥?

शैवीं दीक्षामथ पुनरिदं पूज्य लिङ्गान् शम्भो:
तस्माच्छिवाप्रायमभीष्टं शम फलगतं शैवलिङ्गानि लोके।
तत्पूजाया: फलमविकलं पुण्यकालार्चनीयं
चातुर्वर्णार्चनफलमथो शङ्करस्य प्रवक्ष्ये॥

स्नपनमथ प्रवक्ष्ये नृत्तगीतं च शंभो:
सतिलमपि च . . . . चन्दनार्द्रप्रलेपम्।
सकल कुसुमदानं धूपदीपौ तथा च ±
निवेदनमपि वक्ष्ये ताम्बूलादि प्रयुक्तम्॥
प्राणं ध्यानं जपं चैव प्रदक्षिणप्रणमनौ।
नानादानफलं वक्ष्ये शिवरात्रिव्रतं तत:।

In Public domain. Digitization Muthulakshmi Research Academy

अथ स्वर्गादिफलमथवध्ये रुद्राध्यायने विज्ञानफलम्।

लिङ्गस्थापनमथ तत्क्षेत्रं तथैव शीर्णायतनो शङ्करफलम्।

अथ शङ्करनिन्दकनिन्दां नन्दीश्वरोक्तगीताञ्च।

कस्य कीर्तनमथ पुनरैशामिति चत्वारिंशत्प्रकरणानि।

तत्रादौ शिवमाहात्म्यवर्णनम्। स्मृतौ—

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च महीयते।

3 एते यस्य कला: प्रोक्ता: स शिव: प्रोच्यते बुधै:॥

तथा स्कान्दे— उत्कृष्टे वन्यजातीनां महाशब्द: प्रयुज्यते।

तस्मात्समस्तदेवानां महादेवोऽयमुत्तम:॥

लिङ्गभविष्ययो:— आकाशं लिङ्गमित्याहु: पृथिवी तस्य पीठिका।

आलय: सर्वभूतानां लयनाल्लिङ्गमुच्यते

एकाम्रपुराणे ब्रह्मवाक्यम्—

शङ्करातीतभगवान् ते समुत्कर्षतां गत:।

सर्वं तुल्यमहं प्राप्त: परितुष्टे च शङ्करे॥

लिङ्गे—श्रीविष्णुवाक्यम्—

कल्पान्ते तस्य लिङ्गस्य लीयन्ते सर्वदेवता:।

दीक्षिते ब्रह्मा वामे स्वत्या त्वहं प्रभो:॥ १

हृदये चैव गायत्री सर्वदेवोत्तमाऽङ्गजा।

लीयन्ते मूर्ध्नि वै देवा: सर्वाङ्गे पदविक्रमा:॥

जठरे लीयते सर्वं जगत्स्थावरजङ्गमम्।

पुनरुत्पद्यते तस्मात् ब्रह्माद्यं सचराचरम्॥

कौर्मे—श्रीकृष्णवाक्यम्—

वर्णानां ब्राह्मणो देवो ब्राह्मणानां च देवता:।

देवतानामहं देवो मम देवो महेश्वर:॥

4 बृहन्नारदीये भगीरथं प्रति भगवद्वचनम्—

अहमप्यद्रिजानाथं यजामि प्रत्यहं नृप।

तस्मादाराधयेशानं स्तोत्रैस्स्तुतं सुखप्रदम्॥

एकाम्रपुराणे ब्रह्मवाक्यम्—

अहं दक्षिणतस्तस्य वामे विष्णुर्व्यवस्थित:।

एव एव विश्वात्मा ~~स्सको~~ चतस्रो नैव जाग्रे॥

वासुदेवोऽपि भगवान् विशेशस्थानेशाच्छिवम्।

In Public domain. Digitization Muthulakshmi Research Academy

RS125

शिवदेहगतं विष्णुं दृष्ट्वा मे व्यथितं मनः ॥
शिवप्रसादादखिलं दृष्टोऽहं देहमव्ययम् ।
नारायणशरीरस्थं सुप्रियं परमेश्वरम् ॥
विष्णुभक्तिं समासाद्य यस्मिन् स्तुवते महेश्वरम् ।
यैर्योऽन्तकरताः साक्षाद्येन व्याप्तं जगत्त्रयम् ॥
तस्य मायाभिमां लोके केन मुह्यन्ति पण्डिताः ।
ब्रह्मेन्द्ररुद्र ईशानः प्रभविष्णुर्जनार्दनः ॥
बलेन बालि नोयद्वः उपायस्तस्त्वया हि ।
न शङ्करादस्त्यपरं पवित्रं
न शङ्करादस्त्यपरो गुरुश्च ॥
न शङ्करादस्त्यपरोऽस्ति देवो
नमोऽस्तु तस्मै वृषभध्वजाय ॥
सर्वतः सर्वगः स्थाणुः तेन सर्वं चराचरम् ।
5 व्याप्तं जगदिदं कृत्स्नं रुद्रेणामिततेजसा ॥
लिङ्गे — सत्यं सत्यं पुनः सत्यं न देवः शङ्करात्परः ।
नान्यो मुक्तिप्रदो देवः कल्पकोटिशतैरपि ॥
नास्ति रुद्रसमो देवो नास्ति रुद्रसमो गुरुः ।
नास्ति रुद्रसमं ज्ञानं नास्ति रुद्रसमं तपः ॥
ब्रह्मत्वं केशवत्वं च शक्रत्वं वा सुरैस्सह ।
त्रैलोक्यस्याधिपत्यं वा तुष्टो रुद्रः प्रयच्छति ॥
वामनपुराणे — तस्मिंस्तुष्टे जगद्धाम्नि सर्वकल्याणदायिनि ।
प्राप्यतेऽमृतपायित्वं किं पुनः क्षीरभोजनम् ॥
न पद्माङ्का न चक्राङ्का न वज्राङ्का यतः प्रजाः ।
लिङ्गाङ्काश्च भगाङ्काश्च तस्मान्माहेश्वरी प्रजा ॥
स्कान्दपुराणे — न वज्राम्बुजशङ्खाद्यौ चक्रमुसलमेव च ।
शिवशक्त्याङ्कितो लोके नाङ्क्यं सचराचरम् ॥
दम्पती सुखमेवैते अपि कीटपतत्रिषु ।
सकृत्त्वा सर्वसामान्यो स्वाराध्ये सचनामदे ॥
भावेऽपि सान्निसीदन्ति भाविनो यत्र यद्भुवः ।
दानधर्मे — ये सर्वभावानुगताः प्रपद्यन्ते महेश्वरम् ।
प्रपन्नवत्सलो देवः संसारात्तान् समुद्धरेत् ॥
इति श्रीशादेवविरचिते शिवामृतसारसङ्ग्रहे शिवमहिमाकथनं नाम प्रथमं
प्रकरणम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

RS125

6 अथ केशवशङ्करयोरद्वैतमाह— ब्रह्मनारदीये—

हरिरूपधरं लिङ्गं लिङ्गरूपधरं हरिम्।
ईषदप्यन्तरं नास्ति भेदकृत्पापमश्नुते॥
अनादिनिधने देवे हरिशङ्करसंज्ञिते।
अज्ञानसागरे मग्ना भेदं कुर्वन्ति पापिनः॥
रुद्रो वै विष्णुरूपेण पालयत्यखिलं जगत्।
रुद्ररूपं जगदिदं सृजत्येव स्वयं हरिः॥
हरिशङ्करयोर्मध्ये ब्राह्मणश्चापि यो नरः।
(भेद) ते.... कुम्भरकं भुङ्क्ते यावच्चन्द्रदिवाकरम्॥
भेदकृन्नरकं भुङ्क्ते यावच्चन्द्रदिवाकरौ॥
हरिहरविधातारं यः पश्येदेकरूपिणम्।
स याति परमानन्दं शास्त्राणामेष निश्चयः॥
योऽसावनादिः सर्वज्ञो जगतामादिकृद्विभुः।
नित्यं सन्निहितस्तस्मिन् लिङ्गरूपी जनार्दनः॥
शिव एव हरिः साक्षात् हरिरेव शिवः स्वयम्।
तयोर..... याति नरकान् कोटिकोटिशः॥

7 हरिपूजापराणां शिवपूजारतात्मनाम्।
(न्यू) दुरितानि रिक्तता न स्यात् तथा कर्मसु पण्डितः॥
अभेददर्शिनो देवे परायणपरास्तु ये।
स वन्द्यो ब्राह्मणो नित्यं अस्माभिः किमु सत्तमाः॥
शिवे च परमानन्दे विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्तन्ते ते वै भागवताः स्मृताः॥

कौर्मे, श्रीशिववाक्यम्—

योऽहं स तु विभुर्देवः सोऽपि नारायणः परः।
एकभावेन पश्यन्ति योगिनो ब्रह्मवादिनः॥
तथा— ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरम्।
एकीभावेन पश्यन्ति न तेषां पुनरागमः॥
तथा— यो विष्णुः स स्वयं रुद्रो यो रुद्रः स जनार्दनः।
इति मत्वा यजेद्देवं स याति परमां गतिम्॥
तथा— मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात्।
मोहादवेदनाल्लेशात्ते यान्ति नरकं नराः॥

In Public domain. Digitization Muthulakshmi Research Academy

कापिलसंहितायां श्रीशिववाक्यम् —

सोऽहं नारायणो देवः स त्वहं नीलकन्धरम्।

मया विचार्यते नाहं करोति न करोमि च॥

तथा — शङ्करो नीलकण्ठश्च श्रीधरो नीलविग्रहः।

गौरीश गोपिकाकान्तो ध्यायन्नामेकचेतसा॥

४ तथा — माधवस्योमाधवस्य नास्ति भेदं मयोदितम्।

मूढा भेदं प्रकुर्वन्ति प्रपच्यन्ते हि रौरवे॥

वैष्णवे विष्णुवाक्यम् —

यत्तया यद्धुतं दत्तं तदन्त साखिलं मया।

मत्तो विभिन्नमात्मानं विष्णुं मद्भिन्न शङ्करम् ॥ ?

योऽहं सत्वं जगच्चेदं सदेवासुरमानुषम्।

ज्ञातव्यास्तेधितात्मानं पुरुषा भिन्नदर्शिनः॥

हयशीर्षपञ्चरात्रे विष्णुवाक्यम्

यस्त्वभेदेन नौ पश्येत् तस्य मुक्तिर्न संशयः।

रुक्माङ्गनारदीये विष्णुवाक्यम्

न तुभ्यं मम भेदोऽस्ति यथा विष्णुस्तथा शिवः।

अनयोर्भेदकर्ता च यः कल्पान्ते सखि पच्यते॥ ?

ब्रह्माण्डपुराणे गौरीं प्रति ~~कृष्ण~~वाक्यम् —

दुष्टदैत्यनिहन्तासौ देवानामार्तिनाशनः।

देहीनां दर्शनाद्देहे वासुदेवेति विश्रुतः॥

भव पत्नी पुरा जाता स एव भगवान् हरिः।

नानारूपगतिर्भूत्वा स्वेच्छया चरते जगत्॥

त्वं ~~च~~ देवि विष्णुस्वरूपाऽसि तवमूर्तिस्तथाच्युतः। इति।

न भेदस्त्वनयोरस्ति प्रवदन्ति मनीषिणः॥

तथा। तेन विष्णुः शिवश्चैव ~~च~~ नैकदेहं द्विधाकृतः।

९ अर्धनारीश्वरो देवो या नारी स जनार्दनः॥

विष्णुरुद्रविभेदेना यो विष्णुः स महेश्वरः।

भेदं यः कुरुते मूढः स पापी निरयालयः॥

त्वं देवि विष्णुभावेन त्वसौ देवी महेश्वरः।

मूढा भेदं प्रकुर्वन्ति ज्ञानबुद्धिबहिष्कृताः॥

न विष्णुशिवयोर्भेदो ह्येष धर्मः सनातनः।

ईशानः सर्वभूतानां विष्णुः प्रभवतां वरः॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवो ब्रह्मा शिवो विष्णुः ब्रह्मा विष्णुः शिवात्मना।
एक एव त्रिधा याति कारणात्पुनरेकधा॥
हरिवंशे— शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे।
अथान्तरं न पश्यामि तेन ते दिशति शिवः॥
यो वै विष्णुः स वै रुद्रो यो रुद्रः स पितामहः।
एकमूर्तिस्त्रयो देवा रुद्र विष्णु पितामहाः॥
वरदा लोककर्तारो लोकनाथाय जन्तवे। वः।
अर्धनारीश्वरं तेन व्रतं तत्समाश्रितम्। शिवे
यथा जलं जले क्षिप्तं जलमेव यदा भवेत्।
अग्निमग्निं प्रविष्टस्तु अग्निरेव यथा भवेत्॥
यथा विष्णुः प्रविष्णुश्च रुद्रो विष्णुमयो भवेत्।
रुद्रमग्निमयं विद्यात् विष्णुं सोमात्मकं तथा।
अग्निसोमात्मकं चैव जगत्स्थावरजङ्गमम्॥
10 कर्ता रक्षा च हर्ता च स्थावरस्य चरस्य च।
जगतः शुभकर्माणौ प्रभविष्णु महेश्वरौ॥
कर्ताकारणकर्तारौ कर्ता कारणकारणौ।
भूतभव्यभवौ देवौ नारायणमहेश्वरौ॥
रुद्रस्य परमो विष्णुर्विष्णोश्च परमः शिवः।
एक एव द्विधा भूतौ लोके चरति नित्यशः॥
न विना शङ्करं विष्णुः न विना केशवं हरः। शिवः।
तस्मादेकत्वमायातौ रुद्रोपेन्द्रौ तु तौ पुरा॥
लिङ्गे— शिवस्य विष्णोर्यो भेदं न करोति महामतिः।
शिवभक्तः स विज्ञेयः महापापहरो जनः॥

इति श्रीशिवदेवविरचिते शिवामृतसारसमुच्चये हरिहरयो-
रद्वैतकथनं नाम द्वितीयं प्रकरणम्॥

अथ शिवभक्तिमाह— महाभारते—
जन्मकोटिसहस्रेषु नानासंसारयोनिषु।
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते॥
तथा— निमिषं निमिषार्धं वा मुहूर्तं च क्षणं कला। लवार्ध।
न लभ्य प्रसादश्च भक्तिर्भवति शङ्करे॥
वाणे शिवनाम—

In Public domain. Digitization Muthulakshmi Research Academy
॥ R5125

प्रदोषे शङ्करं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥
सार्वकालकृतं पापं दृष्ट्वा पर्वणि सन्त्यजेत् ॥
इति श्रीशिवदेव विरचिते शिवामृतसार समुच्चये प्रदोष फल कथनं नाम
अष्टमं प्रकरणम् ॥

अथ कीर्तनफलमाह — स्कान्दे —
अश्वमेधसहस्रस्य सहस्रगुणितस्य च ।
फलं प्राप्नोति वचनान्महादेवस्य नामतः ॥
कोटिप्रस्थादशशततीर्थानां च फलं लभेत् ।
प्राकर्ष्यं लभते तत्त्वं महादेवेति कीर्तनात् ॥
लिङ्गे — महादेव महादेव महादेवेति यो वदेत् ।
एकेनापि भवेन्मुक्तिः द्वाभ्यां शम्भुर्ऋणी भवेत् ॥
महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥ ?
यो मर्त्यः सुमना ब्रूयान्महादेवेति निश्चयः ।
19 नारदीये — धेनूनामष्टकोटीनां सम्यग्दानेन यत्फलम् ।
तत्फलं तद्विशिष्टं च महादेवेति कीर्तनात् ॥
महादेवेति यत्रास्ति वक्त्रे वर्णचतुष्टयम् ।
चतुर्भिरक्षरैर्दैवैः पुरुषार्थैः स युज्यते ॥
तथा — महादेवेति यो गायन् पञ्चत्वमुपगच्छति ।
(स) रुद्रलोके रुद्रस्य पूज्यते देववद्गणैः ॥
तथा यमवाक्यम् — महादेवेति यो नाम सकृदुच्चारितं नरैः ।
अलं भवं भयात्तेषां अघोरान्नारकादपि ॥
बृहन्नारदीये — हरिस्मरणनिष्ठानां शिवनामरताननाम् ।
सर्वे समस्तकार्याणि यान्ति सम्पूर्णतां द्विजाः ॥
(रुद्रेश)? शिव शङ्कर रुद्रेश नीलकण्ठ त्रिलोचन ।
इतीरयन्ति ये नित्यं ते कृतार्था न संशयः ॥
शिवेति नीलकण्ठेति शङ्करेति हरेति च ।
सर्वभूतहितो नित्यं स वन्द्योऽस्मासु उत्तमः ॥
शिवरहस्ये — ध्यायन् कृते यजन् यज्ञैः त्रेतायां द्वापरेऽर्चनात् ।
यदाप्नोति तदाप्नोति कलौ शङ्करकीर्तनात् ॥
त्रिपुरहर हरादिदेव शम्भो
त्रिनयनेश रुद्र शूलपाणे ।
20 भवशरणमितीरयन्ति येऽस्मिन्
भवजलधौ न पतन्ति मनुजाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

स्कान्दे – श्रीशिववाक्यम् –

अर्धश्लोकं तु यो देवि ध्यायेन्नामानि कीर्तयेत् ।
चतुर्दश्यां तु वाष्टम्यां पक्षयो रुभयोरपि ॥

वामदेव वासुदेवेति हर गुह्य शिव पुनः ।
उमापते नीलकण्ठ स्थाणो श्रीकण्ठ गोपते ॥

शर्वेश पशुपते शङ्कर प्रणवेश शिव ।
महादेवेति चान्योन्यं नाम गुह्यं प्रकीर्तयेत् ॥

प्रमुच्यते सर्वपापैः दिवि देवैः प्रमोदते ।
इदमेवापि यः कालि पठित्वा पाठयेत्सदा । पठेद्वा
स देह पद्धतिं भित्त्वा सामेव प्रतिपद्यते ॥

नारदीये – जयेश्वर महादेव जय भूतपते हर ।
जयाशेष महापाप मोचक त्रिपुरान्तक ॥

जय मुख्यार्थ यो नाम स्मरेद्देवस्य शूलिनः ।
विसृज्य प्राणिनं सर्वं स याति परमां गतिम् ॥

ब्रह्माण्ड पुराणे – कृत्तिवासेति यो नाम कीर्तयेद्भुवि मानवः ।
तस्य यत्फलं वक्तुं शेष देवो न शक्नुते ॥

विना तीर्थैर्विना यज्ञैर्विना दानैर्विना व्रतैः ।
मुक्तिं प्रयान्ति मनुजाः कृत्तिवासेति कीर्तनात् ॥

21 आदित्ये – कीर्तयन्ति च ये रुद्रं सकृज्जप्याति मानवाः ।
सर्वपापैः प्रमुच्येत सप्तजन्मकृतैरपि ॥

॥ इति श्री शाद्वल विरचिते शिवामृतसारसमुच्चये कीर्तनफल
कथनं नाम नवमं प्रकरणम् ॥

—— * ——

अथ स्मरणमाह – महाभारते ——

स्मरणादेव रुद्रस्य पापसङ्घात पञ्जरम् ।
शतधा भेदमायाति गिरिर्वज्रहतो यथा ॥

कृते पापेऽनुतापो वा यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं शिवसंस्मरणं परम् ॥

(लीलया) ब्रह्माण्ड पुराणे – लीलया व्यवहारेण यत्संयमनेन वा ।
ये स्मरन्ति विरूपाक्षं तेभ्यो नित्यं नमो नमः ॥

स्मरणादेव रुद्रस्य पापसङ्घातसञ्चिताः ।
शतधा भेदमायाति यथा वज्रहतो गिरिः ॥

तथा – नो भजन्ति विरूपाक्षं न ते प्राकृत मानवाः ।
रुद्रा रुद्रात्मका ज्ञेयाः तेभ्यो ऽपि च नमो नमः ॥

22 महाभारते – मित्रस्य बलान बन्धूनां कुर्याच्छिवात्मकाः ।
अपि कीर्तनमायान्ति पापमुक्ताः शिवां गतिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेद्देवमीशानं सर्वपापैर्न लिप्यते॥ (र्न)

(स्मरणेन) तथा— ध्यानेन ये नरा नित्यं संस्मरन्ति महेश्वरम्।
तेऽपि यान्ति तनुं त्यक्त्वा शिवं लोकमनामयम्॥
एककालं द्विकालं वा त्रिकालं नित्यमेव वा।
ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः॥

शिवपुराणे - श्रीशिववाक्यम्—
सर्वदा वर्तमानोऽपि यो मां देवि सदा स्मरेत्।
रुद्रलोकमवाप्नोति पश्येच्च वृषभध्वजम्॥

॥ इति श्रीशादेवविरचिते शिवामृतसारसमुच्चये स्मरणफलकथनं
नाम दशमं प्रकरणम्॥

= * =

अथ दीक्षाफलमाह—
दीक्षिते मुच्यते देवि देही तीर्थे मृतोऽपि विग्रहः।
यथा कुलालचक्रस्थो भ्रमिमेत्यपि जलद्घटः॥
म्रियते यत्र कुत्रापि शिवलोकं स शाश्वतम्।
भवतीति न सन्देहः कथितं तव सुव्रत॥

कौर्मे— सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम्।
23 तत्सर्वं प्राप्नुयान्नित्यं दीक्षितो नात्र संशयः॥

तथा— सीसकं रजतं ताम्रं लोहं चेति चतुष्टयम्।
यद्वद्भवेत्सुवर्णत्वं करोति शिवलिङ्गकम्॥

बृहन्नन्दिकेश्वरे— गुरुदेवदक्षिणां दत्वा विशिष्टं लभते फलम्।
दक्षिणायामदत्तायां दोष एव हि जायते॥

बृहत्कालोत्तरे— अदीक्षितस्य संस्पर्शं पूजाकाले विवर्जयेत्।

ब्रह्मपुराणे— आगमोक्तेन मन्त्रेण विधानोक्तेन शङ्करम्।
अदीक्षितस्तु नाम्ना तु मूलमन्त्रेण नार्चयेत्॥

इति श्रीशादेवविरचिते शिवामृतसारसमुच्चये दीक्षाफलकथनं
नामैकादशं प्रकरणम्॥ द्वादश

= * =

अथ पूजार्थलिङ्गफलकथनम्— भविष्ये—
लिङ्गदेव महादेव सर्वदेवाश्रयस्थितः।
अनुग्रहाय लोकानां तस्माल्लिङ्गं प्रपूजयेत्॥

बृहत्कालोत्तरे— बाणं चैव स्वयम्भूश्च मयं शिवनिर्मितम्।
अनुग्रहाय लोकानां तस्मान्नित्यं प्रपूजयेत्॥
तस्माद्बाणं सदा पूज्यं स्वयम्भूपूजनं फलम्॥

24 बृहन्नन्दिकेश्वरे— भुक्तिप्रदं बाणलिङ्गं पूजितं येन संशयः।

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद्बाणं सदा पूज्यं स्थापितं तरलं भवेत्॥

स्कान्दे — बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथा॥
एकमेव प्रपूज्यानि शिवलिङ्गानि भावते॥

लिङ्गे — धूपमाषः स्त्रियः पुत्रान् यज्ञान्यं न… सेवितम्।?
स्फाटिकं लिङ्गमासाद्य यजमानः समश्नुते॥

स्मृतिः — स्थण्डिले च फलं प्रोक्तं प्रतिमायां द्विगुणं भवेत्।
स्फाटिके त्रिगुणं प्रोक्तं (श्रेष्ठं) बाणे चैव चतुर्गुणम्॥
रत्नजे पञ्चगुणितं षड्गुणं चैव नीलके।
माणिक्ये सप्तगुणितं मरकते ऽष्टगुणं स्मृतम्॥ (मरकते)
निजमूर्तौ गुरौ मूर्तौ पुस्तके सलिलेऽनले॥
त्रिमार्गौ स्थण्डिले बाणे बाणश्चायत मुत्तमम्॥

इति श्रीशादेव विरचिते शिवामृतसारसमुच्चये पूजालिङ्गकथनं नाम
त्रयोदशं प्रकरणम्॥

अथ विशेष लिङ्गार्चनमाह — शिवधर्मे —
यः कुर्यात् पार्थिवं लिङ्गमर्चयेत् सर्वदैव हि।
इहैव धनवान् श्रीमान् सोऽपि रुद्रोऽभिजायते॥

25 त्रिकालपूजायाम् —
अनेनैव स देहेन रुद्रः सन्तिष्ठते क्षितौ।
पापहा सर्वमर्त्यानां दर्शनात्स्पर्शनादपि॥

महाभारते — मृण्मयं मण्डलं कृत्वा भवं माल्येन पूजयेत्।
तस्य माल्यं तथा पार्थ किरातशिरसि स्थितम्॥
मृण्मयं धनदं धान्यं श्रीप्रदं सर्वकामदम्॥
मृद्भस्म गोमयैश्चैव तथा वालुकयापि वा।
कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि॥

शैवे — क्रीडन्ति शिशवो यत्र लिङ्गं कृत्वा राजान्तिके।
मृण्मयं सैकतं वापि जायते भूमिपालकः॥

शिवधर्मे — ब्रह्मा पूजयते नित्यं लिङ्गं शैलमयं शुभम्।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम्॥
इन्द्रनीलमयं लिङ्गं विष्णुरर्चयते सदा।
विष्णुत्वं प्राप्तवान् तेनाच्युतैकसनातनम्॥
शक्रोऽपि देवराजेन्द्रः लिङ्गं मणिमयं कृतम्।
भक्त्या पूजये नित्यं *तेन शक्रत्वमाप्तवान्॥

In Public domain. Digitization Muthulakshmi Research Academy

ताम्रलिङ्गं सदा कालं भक्त्या देवो दिवाकरः।
समभ्यर्च्य ततस्तेन प्राप्तं सूर्यत्वमुत्तमम्॥
कुबेरः काञ्चनमयं लिङ्गमभ्यर्चते सदा॥

26 तेनासौ धनदः श्रीमान् मानवैः परिगीयते॥

इत्येवमादितं ज्ञातव्यम्। पद्मपुराणे—

समर्चयति भूतेशं लिङ्गै रेवसमुद्भवे।
स्फाटिके रत्नलिङ्गे वा पार्थिवे वा स्वयंभुवे॥
स्थापिते वै सुतीर्थे वा क्षेत्रे वा वैधनावने।
नमः शिवाय मन्त्रेण कुर्वन्ति स्तु जपं सदा॥
शृण्वन्ति यमनेकस्य कथामपि न ते नराः॥

इति श्रीशादेव विरचिते शिवामृतसारसमुच्चये शिवलिङ्गपूजन
कथनं नाम चतुर्दशप्रकरणम्॥

—— ✱ ——

अथ पूजाफलमाह—

शिवपूजापरो यस्तु शिवपूजापरायणः।
स्त तु दान शिवतुल्यस्य घोरे कलियुगे द्विजाः॥
शिवप्रिया शिवासक्ताः शिवपादार्चने रताः।
त्रिपुण्ड्रधारिणो ये च ते वै भागवता नराः॥
तः भगवद्भावाम्— परोगताः पर्वमुख्या शिवार्चनपरायणाः।
तत्कथाश्रवणासक्ताः वहन्ति सततं हि माम्॥

पाद्मे— शिवपूजाप्रभावेण शिवभक्ताः शिवे रताः।
मोदन्ते शिवलोके ते यावदिन्द्राश्चतुर्दश॥
27 शिवार्चनपुण्यस्य कलां नार्हति षोडशीम्॥

कौर्मे— एककालं द्विकालं वा त्रिकालं नित्यमेव वा॥
येऽर्चयन्ति महादेवं स रुद्रो नात्र संशयः।
अग्निहोत्रं त्रिवेदश्च यज्ञाश्च बहुदक्षिणाः।
शिवलिङ्गार्चनस्यैते कोट्यंशेनापि नत्समाः॥

भविष्ये— यस्तु पूजयते नित्यं शिवं त्रिभुवनेश्वरम्।
स्वर्गराज्यमोक्षाणां क्षिप्रं भवति राजनः॥

शिवपुराणे— ब्रह्महा नः पितृहा गोघ्नः मद्यपो गुरुतल्पगः।
शिवलिङ्गार्चनरतः स याति गतिमुत्तमाम्॥

तथा— सर्वेषामेव तीर्थानां यत्फलं परिकीर्तितम्।
मासेन ... तदवाप्नोति लिङ्गस्याभ्यर्चनाद्ध्रुवम्॥
शिवपूजापरो नित्यं शिवपूजापरायणः।
मुच्यते सर्वपापेभ्यो दशजन्मशतैरपि॥

In Public domain. Digitization Muthulakshmi Research Academy

 RS325.

शिवपूजापरो नित्यं महापातकसंभवैः।
दोषैर्न लिप्यते सर्वैः पद्मपत्रमिवाम्भसा॥
महाभारते — हत्वा भित्वा च भूतानि दत्वा सर्वमिदं जगत्।
यजेद्देवं विरूपाक्षं न स पापैर्विलिप्यते॥
श्रीलिङ्गे — अनेकजन्मसाहस्रैः भ्राम्यमाणस्तु योनिषु।
न . . . माप्नोति मुक्तिं यो लिङ्गार्चनमृते नरः॥
28 भुवनानि मनोज्ञानि दिव्यमाभरणास्त्रियः।
धनं वा तुष्टिपर्यन्तं शिवस्यार्चनतो लभेत्॥
स्कन्दपुराणे —
मोक्षज्ञानं तथा योगं प्राणायामो च धारणम्।
लिङ्गस्याभ्यर्चनात् सर्वं जायते नात्र संशयः॥
शिवधर्मे — यावन्नाभ्येति मरणं यावन्नाक्रमते जरा।
यावन्नाद्रियते कैवल्यं तावत्पूजय शङ्करम्॥
न शैवस्माद्धर्मोऽस्ति तुल्योऽन्यो भुवनत्रये॥
इति विज्ञाय यत्नेन पूजनीयः सदाशिवः॥
स्कान्दे — व्यापारान् सकलान् त्यक्त्वा पूजयध्वं सदाशिवम्।
निलयाइव हरयन्ते कृतान्तनगरं द्रुमाः॥
सत्यं वाच्मि हितं वाच्मि सारं वाच्मि पुनः पुनः।
असारेऽस्मिन्हि संसारे सारमेव हरार्चनम्॥
त्रिकालार्चनमाह — शिवधर्मे —
प्रातरुत्थाय यो लिङ्गं भक्त्या संपूजयेत् नाम्नात् (सकृत्)।
कपिलानां शतं हुत्वा (दत्वा) यत्फलं दत्त (तत्) माप्नुयात्॥
तथा — मध्यं दिनकरे प्राप्ते यो लिङ्गं प्रतिपूजयेत्।
संपूर्णां पृथिवीं दत्वा यत्फलं तदवाप्नुयात्॥
तथा — वारुणीमिश्रिते सूर्ये यः शिवं सम्यगर्चयेत्।
गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात्॥
29. मासि मासि च योऽश्नीयात् यवान्नं व्रतमुत्तमम्।
यश्चार्चयेत् सकृल्लिङ्गं सममेतन्न संशयः।
यः प्रदद्यात् गवां लक्षं दोग्ध्रीणां वेदपारगे॥
एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम्॥
स स्नातः सर्वतीर्थेषु स सर्वोपरि संस्थितः।
यः पूजयेन्महादेवं लिङ्गं सर्वार्थसाधकम्॥
अत्र श्री शिववाक्यम् —
योऽर्चयन्मूर्तये मां हि पूर्णं वर्षशतं नरः।
एकं च दिवसं लिङ्गं सममेतं न संशयः॥

In Public domain. Digitization Muthulakshmi Research Academy

बृहत्कालोत्तरे - श्रीशिववाक्यम् —

असंपूर्णा कृता पूजा मन्त्रवर्णक्रियादिभिः ।
तथापि लिङ्गे शम्भोः पूजा भवति षण्मुख ॥
तदूनाधिका कार्या पूजा वै षण्मुखे क्वचित् ।
न्यूनाधिका न या पूजा फलहीना प्रकीर्तिता ॥
(तस्मात्) ~~प्राकस्मिन्~~ कारणाद्भक्त्या लिङ्गाराधनमाचरेत् ॥

स्कान्दे श्रीशिववाक्यम् —

मनसा चिन्तयेद्यस्तु पूजयामि हरं परम् ।
अशक्तो नास्ति च द्रव्यं यस्य नित्यं मदर्चने ॥
स तया श्रद्धया पूतो विमुक्तः सर्वपातकैः ।
मम लोकमवाप्नोति भिन्ने देहे न संशयः ॥
30 मेरुमन्दरमात्राणि राशीः पापस्य कर्मणः ।
शिवस्यैवार्चनात् क्षिप्रं विलयं याति सर्वतः ॥
षडङ्गेन च योगेन यो मामर्चयते सदा ।
स मे प्रविशते देहे नास्ति सङ्गो विचारणा ॥
अर्घं विनैव मन्त्रेण पुण्यं राशिः प्रकीर्तिता ॥
स्यादयं मन्त्रसंयुक्तः पुण्यः शतगुणाधिकम् ॥

भविष्ये — वरं प्राणपरित्यागो शिरसो वापि कर्तनम् ।
नैव संपूज्य भुञ्जीत भगवन्तं त्रिलोचनम् ॥

॥ इति श्रीशैवाचार्यविरचिते शिवामृतसारसमुच्चये पूजाफल
कथनं नाम पञ्चदशप्रकरणम् ॥

—·×·—

अथ पुण्यकालार्चनफलमाह —

व्यतीपाते दिनच्छिद्रे चन्द्रसूर्यग्रहे तथा ।
युगादौ विषुवसंक्रान्तौ पुण्ययोगेषु सर्वशः ॥
यत्र यत्रार्चितो देवो विजनाक्षो वृषध्वजः ।
तत्र तत्राक्षयं पुण्यमिति प्राह पितामहः ॥

शिवपादपुराणे — चान्द्रायणसहस्राणि तथा कृच्छ्रशतानि च ।
सर्वदानानि पुण्यानि लिङ्गस्याभ्यर्चने कृते ॥

अर्धाद्रविसंक्रान्तौ - शिवधर्मे —

31 नैरन्तर्येण षण्मासं विधिना पूजयेच्छिवम् ।
पुण्यं तदेव सकलं लभते विषुवार्चनात् ॥
शते देवाविहेयं ग्रहणे चान्द्रसायणे ।
संक्रान्तिषु दिनच्छिद्रे षडश्या तिमुखे कुचे ॥
मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शङ्करम् ।
तत्कार्तिके भवेत्पुण्यं जीर्णमाल्यं विशोधतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

भविष्ये— मासे मासे समायुक्ते त्रिसन्ध्यां योऽर्चयेच्छिवम्।
लभेत्पापमासिके पुण्यं - - - - - ॥
माघे मासे तथा ज्येष्ठे कार्तिके च विशेषतः।
त्रिषु पुण्यं समाप्नोति मासेष्वेतेषु यत्फलम्॥
यस्तु कृष्णचतुर्दश्यां स्नात्वा देवं पिनाकिनम्।
आराधयेद् द्विजश्रेष्ठ न तस्यास्ति पुनर्भवः॥
पद्मपुराणे—
कार्तिके भौमवारेण चित्रा कृष्णचतुर्दशी।
तस्यामाराधितः स्थाणुः नयेच्छिवपुरं ध्रुवम्॥
संवत्सरमथं देवि एकाहारेण योऽर्चयेत्।
एकेन जन्मना मुक्तिमसौ परमाप्नोति सध्रुवम्॥
एकपाद्मपुराणे—
32 चतुर्दश्यां मार्चितेल्लिङ्गे जम्बूद्वीपपतिर्भवेत्।
अमावास्या मार्चितेल्लिङ्गे सप्तद्वीपाधिपो भवेत्॥
॥ इति श्रीशङ्कर विरचित शिवामृतसारसमुच्चये पुण्यकालार्चन
फलकथनं नाम षोडशं प्रकरणम्॥

—— ⁘ ——

अथ चतुर्वर्णार्चन फलमाह— स्कान्दभविष्ययोः—
यस्तु पूजयते लिङ्गं देवादीनां जगत्पते।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः॥
तेषां प्रतिपद्याम्यामि शृणुष्वैकाग्रमानस।
दै विप्रस्य तु सदैवाहं शृणु चैवं पदुचेशिखे॥
गृह्णन् बलिं प्रहृष्यामि प्रियाणां शिवदर्शनात्।
क्षत्रियस्य तथा पूजा अभिस्या द्रव्यविक्रमम्॥
अर्चनं प्रति गृह्णामि प्रियो भूत्वा द्विजाननः।
स्कान्दे— स्नापयेद् योऽम्भसा लिङ्गं सर्वपापैः प्रमुच्यते॥
अयुतं यो गवां दद्यात् दोग्ध्रीणां वेदपारगे।
हेमवस्त्रादियुक्तानां क्षीरस्नानेन यत्फलम्॥
बृहन्नारदीये— कृष्णपक्षे चतुर्दश्यां सोमवारे च भूपते।
शिवं संस्नाप्य दुग्धेन शिवसायुज्यमाप्नुयात्॥
तथा— शिवं संस्नाप्य दुग्धेन शिवसायुज्यमाप्नुयात्॥
33 तथा शिवं संस्नाप्य यत्नेन पुष्पोदकफलोदकैः।
सोमवारे महाभाग वसेत्कल्पायुतं दिवि॥
तथा— नारिकेलोदकेनापि शिवं संस्नाप्य भक्तितः।

In Public domain. Digitization Muthulakshmi Research Academy

R5125

मश्नुते ॥

अष्टम्यां सिन्धुवारेण शिवसायुज्यं माप्नुयात् ॥

शैवे — सकृद्वा गव्येण पयसा शिवलिङ्गं स्नापयेन्नरः ।

राजतेन विमानेन सोमलोकं स गच्छति ॥

भविष्ये — स्नाप्य लिङ्गं सकृद् दध्ना (विष्णुलोके महीयते)

कृष्णायां कृष्णपक्षस्य .... जितः ।

कुलैकविंशमुत्तीर्य शिवलोके महीयते ॥

शिवधर्मे — स्नाप्य लिङ्गं सकृद्दध्ना विष्णुलोके महीयते ॥

भविष्ये — कल्पकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ।

घृताभ्यङ्गं न तत्सर्वं मुच्यते नात्र संशयः ॥

भविष्ये — कृष्णाष्टम्यां घृतस्नानं कृत्वा लिङ्गं सकृन्नरः ।

कुलैकविंशमुत्तीर्य शिवलोके महीयते ॥

बृहन्नारदीये — घृतेन स्नापयेल्लिङ्गं मुख्यानं द्वादशी दिने ।

केशवं परया भक्त्या यत्फलं वदतः शृणु ॥

जन्मायुतार्जितैः पापैः विमुक्तः परमां गतिम् ।

कुलकोटिसमायुक्तः समाप्नोति न संशयः ॥

विष्णुधर्मोत्तरे — आ लिङ्गान्मेदि पर्यन्तं यो दद्याद् घृतकम्बलम् ।

जागरं नृत्तगीताद्यां सर्वं कृत्वा च पर्वणि ।

मन्वन्तरसहस्राणि शिवलोके महीयते ॥

35 पर्वणि मकरसंक्रान्तौ — शिवधर्मे —

नैरन्तर्येण यो मासं घृतस्नानं समाचरेत् ।

एकाविंश कुलोपेतो याति वै शङ्करालयम् ॥

बृहन्नारदीये — कृष्णपक्षे तथा श्विन्यां चतुर्दश्यां च भूपते ।

घृतेन मधुना स्नाप्य शिवसायुज्यमाप्नुयात् ॥

भविष्ये — मधुना स्नापयित्वा तु वह्निलोके महीयते ।

शिवमिक्षुरसैः स्नाप्य यः स्नापयति भक्तितः ॥

शिवलोके वसेत्कल्प शतकोटिकुलान्वितः ।

भविष्ये — स्नानमिक्षुरसेनेह यो लिङ्गे सकृदाचरेत् ॥

लभेत् गन्धर्वलोकं सर्वकामसमान्वितः ॥

बृहन्नारदीये — तिलतैलेन संस्नाप्य विष्णुं वा शिवमेव वा ।

स याति तस्य सारूप्यं कुलत्रितयसंयुतः ॥

भविष्ये — मधुना स्नापयित्वा तु वह्निलोके महीयते ।

शिवमिक्षुरसेनापि यः स्नापयति भक्तितः ॥

शिवलोके वसेत्कल्पं शतकोटिकुलान्वितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

स्नापयेत्तिलतैलेन गणकेशो भवेन्नरः॥
शीतैः शिशिरस्य गात्रैस्तत्र वायुलोके महीयते॥
स्कान्दे शिवमाहात्म्ये— सुगन्धेन च तैलेन स्नपनं यः करोति मे।
अत्युत्तम फलं तस्मै सौगन्ध्यं च ददाम्यहम्॥
शिवधर्मे— कपिलापञ्चगव्येन कुशवारि ~~युतेन च~~। युतेन च।
35 स्नापयेन्मन्त्रयुक्तेन ब्रह्मस्नानं हि तत्फलम्।
एकाहमपि यो लिङ्गं ब्रह्मस्नानं समाचरेत्॥
विधूय सर्वपापानि शिवलोके महीयते।
भविष्ये— यवगोधूमजैः चूर्णैः कषायैर्गन्धयोजितम्॥
शीतोष्णेनाम्भसा वापि स्नापयेत्तदनन्तरम्।
अर्चयेत्तिलपत्रैस्तु तत्र पीठं निरूपयेत्॥
दशधेनुसहस्राणि दत्त्वा लभते फलम्।
तत्फलं लभते सर्वं लिङ्गस्योद्वर्तने कृते॥
सर्वौषधिमिश्रैर्लिङ्गं (संस्नापयेत् सकृत्।) सकृद्यः स्नापयेन्नरः।
कामगेन विमानेन लिङ्गं संस्नापयेत् सकृत्।
सर्वपापविशुद्धात्मा शिवलोके महीयते॥
फलोदकेन यो लिङ्गं सकृद्यः स्नापयेन्नरः।
उत्सृज्य पापकलिलं पितृलोके महीयते॥
पुष्पोदकेन गायत्र्या कौरवं हेमवारिणा।
रत्नोदकेन चापीन्द्रं लोकं प्राप्य प्रमोदते॥
शिवधर्मे— कुशोदकेन यो लिङ्गं सकृद्यः स्नापयेन्नरः।
कामगेन विमानेन रुद्रलोके महीयते॥
वस्त्रपूतेन तोयेन यो नरः स्नापयेत् सकृत्।
सर्वकामैः सुसंपूर्णो वारुणं लोकमाप्नुयात्॥
मन्त्राष्टशतजप्तेन विमलेनाम्भसा शिवम्।
36 स्नापयित्वा सकृद्भक्त्या शिवलोकमवाप्नुयात्॥
पितॄनुद्दिश्य यो लिङ्गं स्नापयेच्छीतवारिणा।
तृप्ताः स्वर्गं गमिष्यन्ति पितरो नरकादपि।
भविष्ये— लिङ्गं शीताम्बुना स्नाप्य क्षीरेण पयसा चितः।
स्नाप्य पश्चाद् घृतेनेशं कृते नैवाविशयति॥
शतस्नानं त्र्यहं दत्त्वा पूजार्थं वा तु भक्तितः।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः॥

In Public domain. Digitization Muthulakshmi Research Academy

स्कान्दे – स्नानं शतफलं ज्ञेयं अभ्यङ्गं पञ्चविंशतिः।
फलानां च सहस्रे द्वे महास्नानं प्रकीर्तितम्॥
स्मृतिः – फलानाञ्च सहस्रं तु महास्नानं विधीयते।
भविष्ये – कुर्यादेतन्महास्नानं विधिना येन वर्ण विते॥
वार... यः शिवे भक्त्या तस्य पुण्यफलं शृणु।
भक्त्या यथेप्सितान् भोगान् शिवसायुज्यतां व्रजेत्॥
मृत्कुम्भ ताम्रजैः स्नानं कुम्भैः स्नानं शतगुणोत्तरम्।
रौप्यैर्लिङ्गं श्रुतं प्रोक्तं हैमैः कोटिगुणोत्तरम्॥
भविष्ये - स्कान्दे – पाटलोत्पल पद्मानि करवीराणि सर्वदा।
स्नानकाले प्रयोज्यानि ताराभिः सुरभीणि च॥
बृहन्नारदीये – सामान्य वारिणा दत्ते शम्भुं केशित मूर्द्धनि।
फलं शतगुणं प्रोक्तं सहस्रं गाङ्ग वारिणा॥
37 डाकाम्र पुराणे – गन्धकुम्भादि प्रदानेन पृथक्तेषां महाफलम्।
विचित्र दारु भवनस्थ कुम्भैर्लब्धमे शिवोपरि॥
चालयेद्यः पयो धारां स ब्राह्मं पदमाप्नुयात्। (मश्नुते)
डाकाम्र पुराणे – जलपूर्णं च लिङ्गं च शङ्खैः सुगन्ध धूपितैः।
गायतां भावशुद्धानां देवि गच्छाम्यहं पुरः॥
इतीश्वरवाक्यम्॥
॥इति श्री शादेव विरचिते शिवामृत सार समुच्चये स्नपनफल कथनं नाम द्वादश प्रकरणम्॥

—x—

अथ नृत्तगीतफलमाह – डाकपाद पुराणे – शिववाक्यम् –
सर्वेषामेव वाद्यानां नास्ति संख्या यशस्विनि।
ममाग्रे गीयते येन तस्य संख्या न विद्यते॥
न घृते तादृशी प्रीतिः न क्षीरे न च गुग्गुले।
यादृशी चैव गान्धर्वे मम तृप्तिर्वरानने॥
याज्ञवल्क्ये – गीत... यदि गीतेन प्राप्नोति परमं पदम्।
रुद्रस्यानुचरो भूत्वा सह तेनैव मोदते॥
ब्रह्मपुराणे – चण्डिका स्तुतिपाठेन नृत्तगीतेन शङ्करम्।
हविष्यैर्भास्करं देवं धूपदानेन केशवम्॥
स्कान्दे – पूजाकाले त्रिसन्ध्यं यः कुर्याद्गीतेन वादनम्।
38 नृत्यं वा कुरु वाद्यं वा सोऽपीश्वरफलं लभेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

लिङ्गभविष्ययोः - स्नानकाले त्रिसन्ध्यं यः कुर्याद्गीतेन वादनम्।
नृत्तेन मुखवाद्येन तस्य पुण्यफलं शृणु।
यावद्दिनानि कुरुते गीतनृत्तादि वादितम्॥
तावद्युगसहस्राणि रुद्रलोके महीयते॥

शिवधर्मे - भूमिदानेन यत्पुण्यं वस्त्रदानेन यत्फलम्।
मुखवाद्येन तत्सर्वं पुण्यं लभते नरः॥
तदेव पुण्यं गीतस्य नृत्यस्य च निरीक्षतः।
तदेवं जयशब्दस्य तदेवं तालकध्वनेः॥

बृहन्नारदीये - देवतायतने यस्तु भक्तियुक्तः प्रनृत्यते।
गीतानि गायते यश्च तत्फलं शृणु भूपते॥
गान्धर्वराजतां गत्वा नृत्यन् रुद्रगणेश्वरात्।
प्राप्नोत्यनुकुले मुक्तिः आकल्पं दिवि मोदते॥
मुखवाद्यकृता येतु देवतायतने नृपे।
विमानशतसंयुक्ता कल्पं स्वर्गादिवासिनः॥
करशब्दं प्रकुर्वीत देवतायतने तु ये।
सर्वपापविनिर्मुक्ता विमाने सायुतत्रयम्॥
देवतायतने ये तु घण्टावाद्यं प्रकुर्वते।
तेषां पुण्यं विगदितुं कः समर्थोऽस्ति पण्डितः॥

स्कान्दपुराणे - सर्ववाद्यमयी घण्टा बलि युक्ता प्रदक्षिणाम्।
39 मनुवयो मव... नयाश्च मुच्यते नात्र संशयः॥

बृहन्नारदीये - भेरीमृदङ्ग पटह निस्साणैश्चैव डिण्डिमैः।
सन्तृप्य देवदेवेशं लभते तत्फलं शृणु॥
देवस्त्रीशतसंयुक्तः सर्वकामसमन्वितः।
स्वर्गलोकमनुप्राप्य मोदते कल्पपञ्चकम्॥
देवतायतने राजन् कुर्वन् शंखरवं पुनः। नरः।
सर्वपापविनिर्मुक्तो ब्रह्मणा सह मोदते॥
काहलयादिरवं कुर्वन् देवतायतने नरः।
सर्वपापविनिर्मुक्तः सर्वलोकाधिपो भवेत्॥

॥इति श्रीशर्वदेवविरचिते श्रीशिवामृतसारसमुच्चये नृत्तगीतफल कथनं नामोनविंशः प्रकरणम्॥

— x —

अथ तिलाद्यं दानफलमाह - स्कान्दे शिववाक्यम् —
दद्यात् कृष्णतिलांश्चैव शालिशार्कराश्च तथा।

In Public domain. Digitization Muthulakshmi Research Academy

RS125

योगे भार्द्रे सदा देवि सप्ते नन्दी समो भवेत्।
सर्वेषां प्रलये चैव प्राप्ते त्रैलोक्यसङ्क्षये॥
त्यक्त्वा सर्वाणि कर्माणि मामेव प्रतिपद्यते।
भविष्ये शिवनामान् — अर्घ्यं पुष्पफलोपेतं यः शिवाय निवेदयेत्।
स पूज्यः सर्वलोकेषु शिव जन्मो यते चिरम्॥
40 ताम्रपात्रार्घ्यदानेन पुण्यं शतगुणोत्तरम्।
पात्रान्तरविशेषेण पुण्यं स्यादुत्तरोत्तरम्॥
पाद्मे — शिवनामान् — सौवर्णं राजतं कांस्यं पित्तलं चाष्टितिरम्।
सर्वांस्तान् संपरित्यज्य ताम्रं तु मम रोचते॥
व्यासः प्राह — ताम्रार्घ्यपात्रं कुर्वीत ताम्रं शिवप्रियं मतम्।
ताम्रपात्रप्रणाशं च ताम्र ज्योतिः प्रकाशनम्॥
आगमे — गन्ध पुष्पाक्षत यव कुशाग्र तिल सर्षपैः।
सर्वैः समस्त देवानामेतदर्घ्यं मुदीरितम्॥
तथा च — आपः क्षीरं कुशाग्राणि अक्षतैर्यवशालिभिः।
तिलैः सिद्धार्थकैश्चैवार्घ्यमुत्तममुच्यते॥
शतप्रसङ्गाद्युक्तम्। अर्घ्य पात्र निषेधमाह — स्कान्द पुराणे —
नाक्षतैः पूजयेद् विष्णुं न शम्भुं शङ्ख वारिणा।
दूर्वाभिः पार्वतीं चैव न तुलस्या गणेश्वरम्॥
पराशर्यः — अर्घ्य पात्रं न कुर्वीत शंखं शम्भो विशेषतः।
पूजनं केतकी पुष्पैः कृत्वा नरकमश्नुते॥
पद्म पुराणे — विष्णोरर्घ्य विधौ राजन् शंखं पुण्य प्रमोदतः।
(ण) तथा कस्य गतोऽर्घ्य शम्भोश्च न कदाचन॥
प्रमादतो यदि भवेत् पूजनं त्रिपुरद्विषः॥
कुन्देशं शंखतोयेन कोटि कल्पान् सनारकी।
शिवस्य पूजन विधौ न शंखस्य प्रशस्यता
41 पूजाकाले प्रयत्नेन ध्वनिं शङ्खस्य कारयेत्।
यो मूढः कुरुते पूजां जानन् शंखे कपर्दिनः॥
स याति नरकं घोरं ब्रह्मरुद्धहस्को यथा। ?
अत्र शिव पूजायां शंखो वर्ज्यः। ताम्रेणार्घ्यं दातव्यम्।

॥ इति श्री शिवामृतसारसङ्ग्रहेऽर्घ्यदानानि कथनं नाम विंशं प्रकरणम् ॥

अथ चन्दनादि प्रलेप फलमाह — भविष्ये —
लिङ्गस्य लेपनं कुर्यात् दिव्यैर्गन्धैः सुगन्धिभिः।

In Public domain. Digitization Muthulakshmi Research Academy

वर्षकोटिशतं चैव शिवलोके महीयते॥
गन्धात्तु लेपनं पुण्यं द्विगुणं चन्दनस्य तु।
चन्दनाच्चागरुलेपं पुण्यमष्टगुणोत्तरम्॥
कृष्णागरोर्विलेपेन द्विगुणं फलमश्नुते।
तस्माच्चातुर्गुणं पुण्यं कुङ्कुमस्य विधीयते॥
चन्दनागरुकर्पूरैः सूक्ष्मपिष्टैश्च कुङ्कुमैः।
लिङ्गं पर्याप्तमालिप्य कल्पकोटिं वसेद्दिवि॥
सि... कं कर्पूरयुक्तं लिङ्गमालिप्य पीठकम्।
संवीज्य तालवृन्तेन लिङ्गं गन्धैः प्रलेपयेत्॥
वर्षकोटिसहस्राणि वायुलोके महीयते॥

42 आगमे- कर्पूरं कुङ्कुमं पत्रं लवङ्गं च फलत्रयम्।
चन्दनोशीरलोहैश्च गन्धमुत्तममुच्यते॥

स्मृतौ- सौवर्णमुपवीतञ्च दूर्वागन्धाक्षतानि च।
पवित्रं नैत्यकं नित्ये मूलेनारोपयेच्छिवम्॥
पत्तिकाभिः प्रसूनैश्च कुशैर्वा परिकल्पयेत्।
पवित्रं प्रत्यहं शम्भोर्महापुण्यजिगीषया।
सुराश्च देवदेवेशं भूषणैर्भूषयन्ति ये॥
हेमजै रत्नजैः शुभ्रैर्मणिजैश्च सुशोभनैः।
न तेषां कुलमं कोऽपि रुद्रलोके महीयते॥
चन्दनादिप्रलेपं परिधयेति वचनादादिशब्दसूचकेन यज्ञोपवीतादयः कथिताः॥

॥ इति श्रीशादेव विरचिते शिवामृतसार समुच्चये चन्दनादिप्रलेप फलकथनं नामैकविंशं प्रकरणम्॥

—:x:—

अथ सकलकुसुमफलमाह- स्मृतौ—
उत्तमं स्वार्जितं पुष्पं मध्यमं वनसम्भवम्।
अधमं च क्रयक्रीतं पुष्पन्तु त्रिविधं स्मृतम्॥
मलिनं भूमिसंस्पृष्टं कृमिकीटादिदूषितम्।
अङ्गसंस्पृष्टमाघ्रातं त्यजेत्पर्युषितं गुरुम्॥
पुष्पं यथाविधं प्रोक्तं परं चैवापरं तथा।
परापरं च बाह्यं च तथैवाभ्यन्तरं स्मृतम्॥
43 रत्नाद्यैर्निर्मितं पुष्पं परं विद्धि महेश्वरम्।

In Public domain. Digitization Muthulakshmi Research Academy

परं च हेमतारादि निर्मित्रादि परात्परम्।
शतपत्रादिबाह्यं च ह्यन्तरं मानसं स्मृतम्॥
बृहन्नारदीये — पद्मपुष्पेण यो विष्णुं शिवं वा चार्चयते मानवः।
स याति विष्णुभवनं कुलत्रितयसंयुतः।
हरिं च केतकीपुष्पैः शिवं धुत्तूरकैस्तथा॥
सर्वपापविनिर्मुक्तः वसेद्विष्णुपदे युगम्॥
हरिं च चम्पकैः पुष्पैः रक्तपुष्पैश्च शङ्करम्।
समभ्यर्च्य महाराजन् तत्तल्लोकमवाप्नुयात्॥
जातीपुष्पैः शिवं पूज्य बन्धूककुसुमैर्हरिम्।
सर्वपापविनिर्मुक्तः मेरुमूर्ध्नि युगं वसेत्॥
सप्तला कुसुमैर्विष्णुं रुद्रपुष्पैर्महेश्वरम्।
अभ्यर्च्य देवदेवेशौ स्वरूपं याति मानवः॥
अपामार्गदलैर्यस्तु पूजयेद् गिरिजापतिम्।
स याति शिवसायुज्यं चतुर्दश्यां विशेषतः॥
शिवधर्मे — पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः॥
आत्मारामोद्भवैः पुष्पैः पत्रैः संपूजयेच्छिवम्।
पुष्पजातिविशेषेण भवेत्पुण्यविशेषतः॥
तपः शीलगुणोपेते दस्य पारगे । ?
44 सुवर्णकोटिं दत्वा तु यत्फलं तदवाप्नुयात्॥
भविष्ये — अशोकश्वेतमन्दारकर्णिकारदलानि च।
करवीरार्कमन्दारशमीतगरकेसरम्॥
पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवम्।
तानि साक्षात् प्रगृह्णाति तद्भक्त्या सततं शिवः॥
अर्कपुष्पैस्तु यो भक्त्या शिवाय विनिवेदयेत्।
दश दत्वा सुवर्णस्य यत्फलं तदवाप्नुयात्॥
अर्कपुष्पसहस्रेभ्यः करवीरं प्रशस्यते।
करवीरसहस्रेभ्यः बिल्वपत्रं विशिष्यते॥
सर्वेषां पुष्पजातीनां प्रवरं नीलमुत्पलम्।
नीलोत्पलसहस्रस्य यो मालां संप्रयच्छति॥
शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः॥

In Public domain. Digitization Muthulakshmi Research Academy

कालिका पुराणे — अलाभे फलपुष्पाणां नानेनापि प्रपूजयेत्॥
भविष्ये — शमीपुष्पं कदम्बं च कुमुदं तुल्यमुच्यते।
करवीरसमा ज्ञेया जाती विजय पाटला॥
श्वेतमन्दारकुसुमं शिवपद्मं च तत्समम्।
45 नागचम्पकपुन्नागा धत्तूर कुङ्कुमाश्रिताः॥
धत्तूरकैस्तु यो लिङ्गं सकृत्पूजयते नरः।
स गोलक्षफलं प्राप्य शिवलोके महीयते॥
बृहती कुसुमैर्भक्त्या यो लिङ्गं सकृदर्चयेत्।
गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत्॥
स्कान्दे — पद्मानि मृदुगन्धीनि सर्वरत्नानि शूलिनः।
स्वधा प्रियाणि च पत्राणि श्रीवृक्षस्य सदैव हि॥
मालूर श्रीफलावापि इत्यमरः। श्रीवृक्षो बिल्वः। स्मृतिः —
पद्मेन च भवेद्राज्यं चक्रवर्ति सिताम्बुजैः।
चम्पकैः सर्वकामानि पुन्नागैर्नागकेसरैः।
अर्केण श्रियमाप्नोति मोक्षं धत्तूरकेण तु॥
श्रीनीलोत्पलै भवेद्भोगी योऽर्चयेल्लिङ्गमुत्तमम्॥
भविष्ये शिव वाक्यम् —
आम्रातं च लवङ्गं च करुणा कुवलं तथा।
सुरभीणि च सर्वाणि स्थलजाद्यम्बुजानि च॥
गृह्णामि शिरसा देवि यो भक्त्या विनिवेदयेत्।
तथा कांस्यस्य पुष्पाणि मन्दारं चापराजितम्॥
शमीपुष्पाणि चार्वाणि कुब्जकं शाङ्खिनी तथा।
शिवधर्मे — तुलसीपुन्नागतक्कोलनागबकुलसौरभाः॥
कुरवकशिरीषशिंशपा गिरिमल्लिका - - - - ।?
यत्र वृक्षपुष्प किरात जपमन्ध तिलकाम्रचूत बाणाटरूषक
46 लाशे सौगन्धिक दाडिम कूश्माण्ड कर्करीराजवजटा किंशु-
क रक्तचित्रक चम्पक कुरुकोकिलाक्ष। कोविदार कुसुम-
क करञ्जक पद्म करवीरादीनि पुष्पाणि नाना पुराणोक्तम्।
नेपाली वराह दुग्धा शैल लोध्रास्ति मुचुकुन्द प्रियङ्गु धान्य
रक्तोत्पलम्॥ कालोत्तरे —
नमेरुपत्रेण तथा ... कुङ्कुम केसरैश्च
सुगन्धि पुष्पैर्विमलैन सितपद्मैर्विशेषतः॥
नैवं पर्युषितत्वं हि येषां संवत्सरावधि।
पद्मानि सितरक्तानि कुमुदान्युत्पलानि च॥

In Public domain. Digitization Muthulakshmi Research Academy

 RS125

शाकपुष्पाणि पुन्नागं पुन्नागं बिल्वपत्रिका।
येषां पर्युषितासंज्ञा पक्षादिनोद्भवैः स्मृता॥
स्मृतिः— तिलाङ्कगारूढे बिल्वानां नास्ति पर्युषिता कथा।
भविष्ये— प्रत्येकं मुक्तपुष्पेण दश सौवर्णसम्मतम्॥
संग्रन्थितेषु तेष्वेवं द्विगुणं फलमिष्यते।
शिवस्यो परि यः कुर्यात् सु… न पुष्पमण्टपम्॥
शोभनं पुष्पमालाभिर्विराजीतान्तं प्रालिप्यते।
सर्वैः परिवृतः श्रीमान् स गच्छति परं सुखम्॥ (स्थो)
तथा— मालाभिः पूजयेद्देवीं लिङ्गं संपूज्य यत्नतः।
शिवदेव्यास्तु पुत्रः स्यात् तदग्याशो च तिष्ठति॥
शिवधर्मे— यः सुगन्धैः मुक्तपुष्पैः सम्यग् लिङ्गं प्रपूजयेत्।
57 मालाभिर्वापि सुघनैः सोऽनन्तफलमवाप्नुयात्।
स्मृतिः— मन्त्राभिज्ञानसन्त्यागे पूजयन्ति महेश्वरम्।
(दिवा शोभाणि चान्यानि)
लभते परमं ज्ञानं संसारभयनाशनम्॥
भविष्ये— कनकानि कदम्बानि रात्रौ देयानि शङ्करे।
दिवा शोभाणि चान्यानि दिवा रात्रौ च मल्लिका॥
प्रहरं तिष्ठते जातिः करवीरमहर्निशम्।
अभावे नवपुष्पाणां पत्राण्यपि निवेदयेत्॥
अथ पत्रगणमाह—
आदौ बिल्वस्य माहात्म्यं यतो बिल्वः शिवप्रियः॥
स्कान्दे— दर्शनाद्बिल्ववृक्षस्य स्पर्शनात् क्रन्दनादपि॥
अहोरात्रिकृतं पापं नश्यत्येव हि नारद॥
मन्त्रः महादेवप्रियकरो वासुदेवप्रियं सदा।
उमाप्रीतिकरो नित्यं बिल्ववृक्ष नमोऽस्तु ते॥
बिल्ववृक्षं समाश्रित्य त्रिरात्रौ योजितः शुचिः।
शिवनाम जपेल्लक्षं ब्रह्महत्यां व्यपोहति॥
ये तु पापा दुराचाराः श्रीतरुच्छेदकारिणः।
ते तु यावापि नरके पच्यन्ते ब्रह्मणो दिनम्॥
मृताश्च जीवमानाश्च ब्रह्मघ्नाः कीर्तिता भुवि।
तस्मिन्देशे भयं नित्यं यत्र श्रीवृक्षच्छेदकः॥
स्मृतौ— यस्तु कृष्णचतुर्दश्यां बिल्वैर्देवं महेश्वरम्।
58 पूजयेत् परमप्रीत्या तस्य मुक्तिरदूरतः॥
तस्य पत्रपूजायां फलमाह— भविष्ये—

In Public domain. Digitization Muthulakshmi Research Academy

अखण्डैर्बिल्वपत्रैः यस्तु लिङ्गं प्रपूजयेत्।
सर्वपापविनिर्मुक्तो शिवलोके महीयते॥

स्मृतौ — बिल्वपत्रात्परं नास्ति येन तुष्यति शङ्करः।
सर्वकामप्रदो बिल्वो दारिद्र्यस्य प्रणाशनः॥

रुद्रयामले — त्रिदलायेवस्य पार्श्वे तु स्तुतिं कुर्यात्प्रसन्नदाम्।

तथा — अखण्डबिल्वपत्राणि प्रदद्याच्छिवमूर्धनि॥

इति श्रीशिववाक्यम्।

विचित्रैः सुपुष्पैः विचित्रैः सुधूपैः
विचित्रैः सुदीपैः विचित्रैः रसैश्च।
गिरिशप्रिये शैलराजेन्द्रपुत्रि
विना बिल्वपत्रैर्न गृह्णामि पूजाम्॥

तथा — अथ तुलस्यादिपत्रमाह — स्मृतिः —
आपादाब्दं महेशानं तुलसीदलमालया।
संच्छादयति यो मर्त्यो गवां कोटिफलं लभेत्॥
सुरभिर्मल्लिकापत्रं पत्रं कल्हारकस्य तु।
जलकस्तूरिकापत्रं पत्रं श्वेतमरुवकम्।
कर्पूरपत्रिकापत्रं धात्री कनकबर्बरी॥
नागवल्ली मरुवकतुलसी दमनवासनम्।
५१ शृङ्गराजो रुद्रजटा दूर्वा शाकादिशाखलैः॥
तैः शिवपूजा कर्तव्या।
पत्राणामप्यभावेन फलान्यपि निवेदयेत्।
फलानामप्यभावे तु तृणगुल्मौषधैरपि॥
औषधीनामप्यभावेन भक्त्या भवति पूजितः॥

स्कान्दे — लिङ्गपूरन्तु यः कुर्यात् मम देवि दृढव्रते।
शतवर्षसहस्राणि दिव्यानि दिवि मोदते॥
नन्द्यव श्वेतपुष्पाणि शिवधर्मोक्तम्। सर्वशङ्कु
पूजायां फलमन्तकम्, भविष्ये —
वैशाखे मासि कर्तव्या पूजायां पाटलया शुभा।
सर्वान्कामानवाप्नोति ज्येष्ठे पद्मार्चने तथा॥
आषाढे बिल्वकल्हारैस्तदर्थं सिद्धदायकम्।
नवमाल्लिकया पूजा श्रावणे च महाफला॥
कदम्बैश्चम्पकैश्चैव भाद्रपदे सर्वकामदा।
पूजा च फलमाल्या वा कल्याणयुदकदायिनी॥
शतपत्रकया पूजा कार्तिके सर्वकामदा।
नीलोत्पलैर्मार्गशीर्षे पौषे तु कुब्जकैः शुभा॥

In Public domain. Digitization Muthulakshmi Research Academy

माघे तु कुन्द कुसुमैः कुम्भे मरुवकस्तथा।
शतपत्रैस्तथा चैत्रे यो दद्यात् महेश्वरम्॥
सत्यमेतत्सर्वयज्ञानां सर्वदानफलं तथा।

50. शिवपुराणे — पुत्रकामोऽपि कुन्दैस्तु माघे मासमर्चयेच्छुचिः।
लभते स ऋद्धिमान् पुत्रान् पुण्यशीलपरायणान्॥

लिङ्गे — श्रीशिववाक्यम् —
दमनस्य पत्रैस्तु मञ्जरीभिस्तु विशेषतः।
मधुमासे च सम्पूज्य मां च सुरसुन्दरि॥
सर्वदेवपदं भुक्त्वा तेन शिवरूपताम्।

स्कान्दे — सर्वदेवैरत्रौ मीने कुर्याद्दमनभञ्जकाम्।
वर्जनीय पुष्पाण्याह — लिङ्गे —
सर्वबन्धूकपुष्पाणि कुन्दयूथमनान्तिका।
केतकी अतिमुक्तश्च श्वेता चैवापराजिता॥
योजित रक्तश्वेता च तथा भाण्डीरपुष्पकैः।
स्तम्भपुष्पैः कुमार्यैश्च विभीतकुसुमेन च॥
पूजयेद्वा तथा पुष्पैः रौरवैश्चैव नरस्सदा।
गच्छेत्ति नरके पापः पच्येदेव न संशयः॥

उमासंवादे — कापित्थं केतकीं कुञ्जां नकुलं कण्टपाटलम्।
निम्बपुष्पं करञ्जं च धातकीपुष्पमेव च॥
शिरीषगुञ्जकं पुष्पं यातिमुक्तं विसर्जयेत्॥

लिङ्गे — शयनान्तरमालभ्य फाल्गुनान्तं न कारयेत्॥

भविष्ये — केशकीटापविद्धानि शा.... पर्युषितानि च।
51. स्वयं पतितपुष्पाणि त्यजेदुपहतानि च॥
मुकुलैर्नार्चयेद्देवं पक्वेन निवेदयेत्।
फलं चाकुलशितं ....च यत्नात् परित्यजेत्॥

लिङ्गे — शयनान्तरमालभ्य फाल्गुनान्तं न कारयेत्।
यः कुर्याच्चैव मोहात् पूजां दर्शनकेन च॥
अवीच्यां रौरवे वासो भवेदेव न संशयः॥

॥ इति श्रीकादेवविरचिते शिवामृतसारसमुच्चये सकालकुसुम दानफलकथनं नामद्वाविंशं प्रकरणम्॥

—*—

अथ धूपदान फलमाह — भविष्ये —
कृष्णागरुसकर्पूरं धूपं दद्यान्महेश्वरे।
नैरन्तर्येण मासार्धं तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
भुक्त्वा शिवपुरे भोगान् तस्यान्ते स महीपतिः॥

In Public domain. Digitization Muthulakshmi Research Academy

अगरुर्दशसाहस्रं द्विगुणश्च शिलागुरुः । ?
प्रियङ्गुः गुग्गुलुं निर्गमाज्ययुक्तं विशेषतः ॥
52 गुग्गुलुं घृतसंयुक्तं साक्षाद्गृह्णाति शङ्करः ।
मस्तके मासदानेन शिवलोके महीयते ॥

तथा - कृष्णपक्षे चतुर्दश्यां यः साज्यं गुग्गुलं दहेत् । दे
स याति परमं स्थानं यत्र देवः पिनाकधृत् ॥

बृहन्नारदीये - शङ्करस्याथवा विष्णोः घृतयुक्तं च गुग्गुलुम् ।
दत्वा धूपं नरो भक्त्या सर्वपापैः प्रमुच्यते ॥

स्कान्दे श्रीशिववाक्यम् - अमावास्यां तु यो नित्यं सघृतं गुग्गुलुं दहेत् ।
क्षीरेणैव तु सम्मिश्रं गृहमेतन्मम प्रिये ।
सोऽच्युतस्थानमाप्नोति मत्प्रसादान्न संशयः ॥

शिवपुराणे - देवदारुर्नागरश्च सर्जः श्रीवासकुन्दरम् ।
श्रीफलं वाज्यसंमिश्रं दत्वा प्रीति परां श्रियम् ॥

शिवधर्मोत्तरे - तुरुष्कागरुकर्पूरैः शिवचन्दनगुग्गुलैः ।
पञ्चाङ्गिकोन्नृप: । भविष्ये —

कपाटद्वारकुट्याश्चापि चोर्ध्वं सवेदिकम् ।
वासयेत्पुष्पमालाभिर्धूपैश्चापि सुगन्धिभिः ॥
यः करोति सदा भक्त्या तस्य पुण्यफलं शृणु ।
आपूरयन् दिशः सर्वाः आमोदैश्च सुगन्धिभिः ॥
कल्पकोटिसहस्राणि शिवलोके महीयते ॥

अन्यत्र - अगरूणि च गुग्गुलुं शर्करा मधु चन्दनैः ।
धूपयेदाज्यसम्मिश्रैर्नीचैर्देवस्य देशिकः ॥

53 इति श्रीशादेव विरचिते शिवागमसारसमुच्चये धूपदानफल
कथनं नाम त्रयोविंशं प्रकरणम् ॥

—— x ——

अथ दीपदानफलमाह - भविष्ये —

यस्तु दीपं प्रयच्छेद्वै वित्तशाठ्येन देशिकः ।
रुद्राणां सदृशो भूत्वा वृषेण विचरेद्भुवि ॥
तैले नापि च यो दद्यात् घृताभावेन मानवः ।
तेन दीपप्रदानेन शिववद्भ्राजते भुवि ॥
दीपवृक्षं समुद्दिश्य शिवस्यायतने शुभम् ।
पुण्यं सु सम्यगाप्नोति शिवलोकं स गच्छति ॥

तथा - यः कुर्यात्कार्तिके मासि शोभनां दीपमालिकाम् ।
घृतेन च चतुर्दश्यां कृष्णायां तु विशेषतः ॥

सूर्यायुतप्रतीकाशस्तेजसा भासयन् दिशः।
तेजोराशिर्विमानस्थः जगत्पूज्यो भवेत्सदा॥
यावद्दीपप्रसङ्ख्या तु घृतेनापूर्य बोधितः।
तावद्युगसहस्राणि शिवलोके महीयते॥

बृहन्नारदीये— तिलतैलान्वितं दीपं विष्णोर्वा शङ्करस्य वा।
दत्वा नरः सर्वकामान् प्राप्नोत्येव न संशयः॥
घृतेन दीपं यो दद्यात् शङ्कराय च विष्णवे।
54 स मुक्तस्सर्वपापेभ्यो गङ्गास्नानं विशिष्यते॥
अखण्डदीपं यो दद्यात् विष्णोर्वा शङ्करस्य वा।
दिने दिनेऽश्वमेधस्य फलमाप्नोत्यनुत्तमम्॥

शिरसा धारयेद्दीपं सर्वरात्रिं शिवाग्रतः।
नन्दिपुराणे— ललाटे हस्तयोर्वापि लग्नयुक्तस्तोरशि।
कल्पायुतशतं दिव्यं शिवलोके महीयते॥
यावद्दृश्या निमेषास्तु दीपे प्रज्वालिते तथा।
शतवर्षसहस्राणि स्वर्गलोके महीयते॥

आगमे— वर्ती कर्पूरगर्भिण्या सर्पिषा तिलजेन वा।
आरोप्य दर्शयेद्दीपान्दक्षैः सौरभशालिनः॥

॥ इति श्रीशिवदेवविरचिते शिवामृतसारसमुच्चये दीपदानफलकथनं नाम चतुर्विंशं प्रकरणम्॥

अथ नैवेद्यफलमाह— कालिकापुराणे—
साम्रं शीर्णञ्च वृन्तं तु दाडिमं कदलीं तथा।
मातुलुङ्गानि पक्वानि शिवाय विनिवेदयेत्॥
पनसं सहकारञ्च नारिकेलमथापि वा।
लवली क्षीरिकां चापि बिल्वं चापि तथा शुभम्॥
द्राक्षं च नागरङ्गञ्च प्राचीनामलकं तथा।
कर्कारुः कर्कटी चैव तथान्यानि फलानि च॥
55 यान्येतानि सुपक्वानि फलानि विनिवेदयेत्॥
शिवाय गणकैः सार्धं शिवलोके महीयते॥ जैः

लिङ्गे— नालिकेरफलं नीलं शम्भवे चोत्कृत्य दापयेत्।
रम्भायाश्च फलं रम्यं त्वचमुत्सार्य दापयेत्॥
दध्ना सुमिश्रितं चान्नं घृतेनाप्लुत्य दापयेत्।
नारिकेलादिफलवत् यावत्कालमुपस्कृत्य निवेदयेत्॥
शालुकादिमूले च तथैव भक्ष्यते तथैव।
अन्यथा चैव यो दद्यात् नैवेद्यं चाप्यनुक्रमात्॥
ब्रह्महत्यासमं पापं कर्तुर्नैव न संशयः॥

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतौ — यथा देहे तथा देवे भक्ष्यभोज्यादि कल्पयेत्।
स्नानं च वाससी चैव गन्धपुष्पादिकं च ॥
तदन्नास्तस्य देवताः
रामायणे - श्रीरामवाक्यम् - यदन्नः पुरुषो राजन् तदन्नाः पितृदेवताः ॥
इदं भक्ष्यं महाराज इङ्गुदीफलमुत्तमम् ॥
भविष्ये — शालितण्डुलप्रस्थं तु कुर्यादन्नं सुसंस्कृतम्।
शिवाय तं चरुं दद्यात् चतुर्दश्यां विशेषतः ॥
हरिद्रां कुलत्थ इक्षुं पायसं यावकं तथा।
घृतं च गुडसंमिश्रमेवमादि प्रकल्पयेत् ॥
यावन्तः तण्डुलास्तु तं नैवेद्ये परिसङ्ख्यया।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥
56 शिवधर्मोत्तरे — क्षीरयुक्तेन नैवेद्यं दशकोटिगुणाधिकम्।
शर्करायष्टिसंयुक्तं तत्फलं स्याद्दशाधिकम् ॥
पायसं घृतसंपूर्णं तु विशिष्टान्नव्यञ्जनपाकं ~~[illegible]~~ रसाल ?
तिलमोदनम्। आरोपणक्षीरप्रवासादि नानादानस्य फलमनेकम् ॥ ?
वाराहे — त्रिषु वर्णेषु कर्तव्यं पाकभोजनमेव च।
स्नातकैर्यास्वनि वर्णानां शूद्राणां व्रतशासने ॥
कालोत्तरे — अपर्युषितभक्ष्याणि दातव्यानि प्रयत्नतः।
खण्डाद्यं चैव यत्नेन नैव पर्युषितं भवेत् ॥
भविष्ये - गुडखण्डकृतानां च भक्ष्याणां तु निवेदयेत्।
घृतेन पाचितानां तु दत्वा शतगुणं भवेत् ॥
पञ्चसौगन्धिकोपेतं ताम्बूलं विनिवेदयेत्।
शिवाय देवदेवाय तस्य पुण्यफलं शृणु ॥
सुगन्धिदेहस्तेजस्वी सर्वावयवसंयुतः।
वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥
पञ्चसौगन्धिकोपेतं ताम्बूलं कोटिशः फलम्।
कर्पूरयुक्तक्कोल जातीफल लवङ्गकम्।
स्कान्दे - उत्तमं स्यात् शतद्रोणं अर्धार्धं मध्यमाधिकम्।
बृहदन्नादिके प्रोक्तं नित्यकालमिमं शृणु ॥
57 शालीतण्डुलसंमिश्रं स्यादाढकत्रयमेव वा ॥
आढकद्वयमेकं वा स्यादाढके वापि कारयेत्।
सूपगन्धपरिक्लिन्नं नातिपक्वं सुशीतलम् ॥
केशकीटापविद्धं च भग्नं तं च विवर्जयेत्।
तण्डुलाद्द्विगुणं क्षीरं मुद्गं स्यात् तण्डुलार्धकम्।
पाचितं पायसं प्रोक्तं पायसान्नमिदं शृणु ॥
पूर्ववत्तण्डुलं क्षीरं चतुर्भागं गुडं क्षिपेत्।

In Public domain. Digitization Muthulakshmi Research Academy

गुडान्नं प्रक्षिपेदाज्यं सुपक्वं कदलीयुतम् ।
तण्डुलार्धं च मुद्गं स्यात् नालिकेरफलैर्युतम् ॥
पनसाम्रफलैश्चैव मुद्गान्नमिति भाषितम् ।
मरीच रजनीमिश्रं जीरकं कर्पूरकं तथा ।
आलोड्य पाचितं ह्येतत्क्षीरैरन्नमिहोच्यते ॥
ताम्रपात्रं विनायादौ मृण्मयं वा नवं शुभम् ।
देवस्याग्नेयदिग्भागे नैवेद्यन्तु निवेदयेत् ॥
ततो लवङ्ग तक्कोल कर्पूर क्रमुकान्वितम् ।
निवेदयेत्तु ताम्बूलं गन्धपुष्पार्चितं ततः ॥
पूगीफलेन चूर्णेन खदिरेणापि पार्थिवः ।
संयोगं कारयित्वा तु ताम्बूलं चान्य येत्तथा ॥

॥ इति श्रीशदेव निरचिते शिवकृतसारसमुच्चये ताम्बूल नैवेद्य फल कथनं नाम पञ्चविंशं प्रकरणम् ॥

—x—

58 अथ प्राणायामध्यानमाह - शिवधर्मोत्तरे —
उपावि योनि तप्यन्ते यद्दान व्रतानि च ।
सर्व तीर्थाभिषेकश्च प्राणायामस्य तत्समम् ॥
शैवे - जलबिन्दुं कुशाग्रेण मासे मासे तु यश्चरेत् ।
संवत्सरशतं साग्रं प्राणायामैक तत्समम् ॥
देवीपुराणे - प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण विषयान् ध्यानेनानीश्वरान् गुणान् ॥
स्कान्दे श्रीशिववाक्यम् - न शक्तोऽस्ति तपोयुक्तैर्द्रष्टुं मुनिगणैरपि ।
ध्यानिनो नित्ययुक्ताश्च देवि पश्यन्ति मां बुधाः ॥
महाभारते - सर्वलक्षणहीनोऽपि युक्तो वा सर्वपातकैः ।
सर्वं तरन्ति तत्पापं भावेन शिवभावना ॥
शिवरहस्ये - शिवध्यानप्रयो नित्यं महापापयुतोऽपि सन् ।
प्रयाति शिवसायुज्यं कुलैश्च दशभिर्युतः ॥
पाद्मपुराणे - बद्धवीरासनो मौनी निराहारो जितक्लमः ।
ध्यानयोगपरो धीरः उपास्ते वत्सरान् दश ॥
नृसिंहपुराणे - हविषाग्नौ जले पुष्पैर्ध्यानेन हृदये हरिम् ।
अर्चयन्ति मुनयो नित्यं जपेन रविमण्डले ॥
आगमे - कालेशाद्यैः परमसितः स्वपविष्टैस्समेतो
देव्यास्साम्ब वलय करयोः सादरं वीज्यमानम् ।
नर्मक्रीडाप्रहसनपरो हासयन् पाङ्क्ति भोगान्
59 अङ्के पाके कनक घटिके बद्धसानिष्ट देवः ॥

In Public domain. Digitization Muthulakshmi Research Academy

 R5125

ध्यात्वैवं विधिवद्विद्वान् वैश्वदेवं समाचरेत् ॥

॥ इति श्रीशादेव विरचिते शिवामृतसारसङ्ग्रहाख्ये प्राणायामध्यान कथनं नाम षड्विंशं प्रकरणम् ॥

—※—

अथ जपमाह शिवरहस्ये —

ॐ नमः शिवायेति मन्त्रः सर्वार्थसाधकः ।
सर्वमन्त्रमयश्चायमोंकारादि षडक्षरम् ॥
तन्मन्त्रजापिनः कर्म रतस्तद्गतमानसः ।
निष्कामः पुरुषो राजन् स रुद्रः पदमश्नुते ॥

भविष्ये — जातपञ्चाक्षरं ज्ञात्वा संसाराब्धेः प्रमुच्यते ।
राज्यं चैवामरत्वञ्च ब्रह्मलोकगतिस्तथा ॥
रुद्रलोकस्य गमनं कैलासगमनं तथा ।
या काङ्क्षाऽस्ति वाञ्छते मन्त्री दृष्टादृष्टफलं लभेत् ॥
सकृदुच्चारितं येन मन्त्रं पञ्चाक्षरं शुभम् ।
सप्तजन्मकृतं पापं मुच्यते नात्र संशयः ॥

शिवधर्मे — सर्वदा सर्वकार्येषु युतनष्टवनादिषु ।
तस्मै नमः शिवायेति शिवभक्तः शिवं व्रजेत् ॥
ओं नमः प्रतिबन्धोक्तु प्रा--न्तेन सकृत् स्मरन् ।
नमः शिवायेति मन्त्रः स गतिः परमं पदम् ॥

60 स्कान्दपुराणे — अवलिकेन चित्तेन सौ काराञ्चनमोन्तकम् ।
उच्चारयेच्छिवं यस्तु स याति परमं पदम् ॥ परमां गतिम्

ब्रह्माण्डीये — शिवे चित्रकार्ये निरताः पञ्चाक्षरजपे रताः ।
शिवध्यानपरा ये च ते वै भागवतोत्तमाः ॥

पद्मपुराणोत्तरखण्डे —
नमः शिवाय मन्त्रेण कुर्वन्ति ये जपं सदा ।
स्पृशन्ति (?) यमलोकेशा कदाचिदपि न ते नराः ॥ ?

प्रपञ्चागमे — पञ्चाक्षरविहितविलोकवश्ये जगतां मनीषित-
सिद्धिकराम् । सिद्धेन येन देही प्रत्यहं च वाञ्छितं लभते ॥
दीर्घायुर्मोक्षपदं विसर्गापमृत्युः साक्षात्सर्वं प्रयच्छति ।
रूपवनदः । तारा भवति यदस्मात्तदाधिरश्मि धीयते ।

शारदागमे — अथ वक्ष्ये महेशस्य मन्त्रान् सर्वसुसिद्धिदान् ॥
यैः सर्वैः त्रिदशाः प्राप्ताः शिवसायुज्यमञ्जसा ॥
हृदयं परसाक्षी लोकोऽनन्ताभितो मरुत् ।
पञ्चाक्षरमन्त्रः प्रोक्तः ताराद्योऽयं षडक्षरः ॥

तथा — इत्थं संपूजयेद्देवं सहस्रं नित्यशो यजेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वपापविनिर्मुक्तः प्राप्नुयान्मनसेप्सितं फलम्। प्रियम्।
61 द्विसहस्रं जपेद्रोगात् मुच्यते नात्र संशयः॥
त्रिसहस्रं जपेन्मन्त्रं दीर्घमायुरवाप्नुयात्॥
आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात्।
उत्पातजनितान् क्लेशान् मुच्यते नात्र संशयः॥
शतलक्षं जपेत् साक्षात् शिवो भवति मानवः॥

शिवरहस्ये — तस्मान्मन्त्रेण सर्वार्थी स्नानं गन्धफलादिकम्।
क्षि ... पसुवर्णञ्च वस्त्राणि च निवेदयेत्॥
समुद्रतीरे देवस्य हृदे गिरौ देशस्थले तथा।
यथा स्थानेषु सर्वेषु जपं कोटिगुणं भवेत्॥
विष्णोरंगे फलं कोटिरनन्तं शिवसन्निधौ॥

भविष्ये — अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
महापातकयुक्तोऽपि मन्त्रस्यास्य जपात्तथा॥
अधिकारी भवेत्सर्वत्र मितिदेवो ब्रवीच्छिवः।
सन्ध्यात्रितीयमिश्रे — उमासंवादे —
ब्रह्मचर्येण यः सन्ध्यां त्रिकालं यश्च वन्द्यते।
द्वादशाब्दानि गोष्ठेषु तत्फलं शिवसन्निधौ॥

शक्तिसारसमुच्चये —
गृहे तु यः जपं कुर्यात् तदेकगुणमुच्यते।
गोष्ठे वा गोगृहे वापि फलं दशगुणं भवेत्॥
नदीतीरे दशगुणं (शत) सहस्रं देवतालये।
गुणं शतसहस्राणि सिन्धुतीरे त्वनेकशः॥
62 पर्वताग्रे च कोटिः स्यादनन्तं शिवसन्निधौ॥

आगमे — गृहे जपः समः प्रोक्तः गोष्ठे *दशगुणं स्मृतम्।
पुण्यारण्ये तथारामे सहस्रं फलमुच्यते॥
अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतम्।
कोटिं देवालये प्राहुरनन्तं शिवसन्निधौ॥

वृषरस्यां शिवालये विशेषः। पाशिमार्गिपुरवे विशेषः।
अथश्री महेशस्य दक्षिणामूर्तिसन्निधौ। शतेपुरश्चरण (फलम्)
विषयम्। स्कान्दे
रुद्रो रुद्राक्षदानेन भवतीति किमद्भुतम्।
तन्मालया सहाहस्ते रुद्रः संक्रमते द्विजौ॥

धारणमाह — रुद्राक्षान् कण्ठदेशे दशनपरिमितान् मस्तके विंशति द्वे

In Public domain. Digitization Muthulakshmi Research Academy

षट् षट् कर्णौ च कण्ठे करयुगलगतान् द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिः पृथगभिगदितानेकमेकं शिखायां
वक्षस्यष्टाधिकान्यः कलयति शतकं स स्वयं नीलकण्ठः ॥
शक्तिसारसमुच्चये —
पुत्रजैककोटिः स्यात्सौवर्णैः पञ्चकोटिशः ।
दशकोटिः कुशग्रन्थ्या रुद्राक्षैः स्यादनन्तकम् ॥
स्मृतौ — मौक्तिकं खचितं पद्मं रुद्राक्षं मुक्तिहेतवे ॥
तथागमे — सौवर्णैः स्याद्दशगुणाः सर्वैः शतगुणास्तथा ॥
63 कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं फलैः ॥
भैरवतन्त्रे — तन्त्रमन्त्रजपे माला द्वात्रिंशतिरुदाहृता ।
रुद्राक्षं विहिता माला सर्वकर्मप्रसादिनी ॥
॥ इति श्रीशदेवविरचिते शिवामृतसारसमुच्चये जपमाला
कथनं नाम सप्तविंशं प्रकरणम् ॥

— * —

अथ प्रदक्षिणमाह — भविष्ये —
कृत्वा प्रदक्षिणं भक्त्या शिवस्यायतने नराः ।
अश्वमेधसहस्रस्य यज्ञस्य च फलं भवेत् ॥
लिङ्गे — शिवनाभम् — प्रदक्षिणत्रयं कुर्यात् यः प्रसादसमं ततः ।
सव्यापसव्यन्यायेन मृदुचाप्या शुचिर्मतः ॥
पदे पदेऽश्वमेधस्य यज्ञस्य फलमश्नुते ॥
देवीपुराणे — सव्यं व्रजेत्ततः सव्यं प्रणालं नैव लङ्घयेत् ।
ध्यानी भयमना यस्तु शिवे कुर्यात्प्रदक्षिणम् ॥
छिन्नस्तेन भवेद्ग्रन्थिर्न तस्य पुनरुद्भवः ॥
बृहन्नन्दिकेश्वरे — वृषं चण्डं वृषं चण्डं सोमसूत्रं पुनर्वृषम् ।
चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥
वृषस्य वृषणं स्पृष्ट्वा शङ्करस्यावलोकनम् ।
कोटिजन्मकृतात्पापात् तत्क्षणादेव मुच्यते ॥
64 (स्कान्दे) स्मृतौ — एकं चण्ड्यां रवौ सप्त तिस्रः कुर्याद्विनायके ।
चत्वारः केशवे कुर्यात् शिवे चार्धं प्रदक्षिणम् ॥
बृहन्नारदीये — शिवं प्रदक्षिणं कुर्यात् सव्यासव्यविधानतः ।
यत्फलं समवाप्नोति तन्मे निगदतः शृणु ॥
राजन् प्रदक्षिणेनैकेन मुच्यते ब्रह्महत्यया ।
द्वितीयेन नाराजत्वं तृतीयेनेन्द्रसंभवम् ॥
शिवप्रदक्षिणे मर्त्यः सोमसूत्रं न लङ्घयेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

लङ्घिते चैनमेवं स्यात् तस्मात् दयमथुत त्रयम्॥
डाकाम्र पुराणे - प्रदक्षिणं नमस्कारं स्तुतिं वा लक्ष्यपूजनम्।
गीर्वाणाद्याः प्रतीक्षन्ते किं पुनर्मानवादयः।
स्कान्दपुराणे - शम्भोः प्रदक्षिणं कृत्वा सोमसूत्रं न लङ्घयेत्।
पदे पदेऽश्वमेधस्य यज्ञस्य फलमाप्नुयात्॥
राजसूयसहस्राणि तेनेष्टं प्रति वासरे।
शिवप्रदक्षिणं तेन कृतं पापनिषूदनम्॥
पद्मपुराणे - अपसव्यं यतीनां सव्यं तु ब्रह्मचारिणाम्।
सव्यापसव्यं गृहस्थानां नित्यं शम्भोः प्रदक्षिणम्॥
शिवपुराणे - श्री शिववाक्यम् -
यो मां प्रदक्षिणी कृत्य नमस्कारं करोति वै
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
65 नमस्कारमाह - नमः शिवाय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥
स्मृतौ - मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे।
अमृतेशाय शर्वाय महादेवाय ते नमः॥
शिवाय नीलकण्ठाय महादेवाय शूलिने।
भीमाय भयनाशाय पशूनां पतये नमः॥
स्कान्दे - नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः॥
बृहन्नारदीये - नमः कल्मषनाशाय नमो मीढुष्टमाय ते।
नमो रुद्राय देवाय कद्रूपाय प्रचेतसे॥
डाकाम्र पुराणे - नमो ब्राह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय ईशानाय नमो नमः॥
आगमे - स्थूलाय स्थूलभूताय खल्वारि.... त्रिद्विषे।
कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये॥
इत्यादि नमस्कारः। विस्तरो ग्रन्थमध्ये मृग्यः॥
॥ इति श्रीशेषविरचिते शिवामृतसारसमुच्चये प्रदक्षिण
फलकथनं नामाष्टाविंशं प्रकरणम्॥

— ✻ —

अथ प्रणाम फलमाह - शिवरहस्ये -
66 (मा) प्रमादेनापि यैः काऽपि प्रणामः शूलिने कृतम्।

In Public domain. Digitization Muthulakshmi Research Academy

कल्पान्तरे भवेद् ग्रान्थीनीते क्षा जायते पुनः॥
आचारहीनोऽपि नरः कृतोऽपि सकृन्महादेव कृतः प्रणामः।
विध्वस्तदोषोऽमरतामुपैति अष्टाङ्गसंघट्टित भूतलं च॥
प्रदक्षिणीकृत्य यदा वनीश्वरं नमस्करोतीति च चक्रवर्ती।
वरयाहिं पश्चात् ··· यथापुरा·· ॥?

भविष्ये - प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्।
सतां गतिमवाप्नोति न स्यात् क्रतुशतैरपि॥

स्मृतिः - जानुभ्यां चैव पादाभ्यां शिरसा च प्रदक्षिणम्।
कृत्वा प्रणामं देवेश सर्वान्कामानवाप्नुयात्॥
तिस्रः कोटिसहस्राणि तीर्थकोटिशतानि च।
महेदेव प्रणामस्य कलां नार्हन्ति षोडशीम्॥

शिवधर्मे - या संख्यातस्य रेणूनां स्पृशन्ति पाणिपादयोः।
तावद्वर्ष सहस्राणि रुद्रलोके महीयते॥

लिङ्गे - प्रदक्षिणात्रयं कृत्वा शिवस्यायतने नरः।
कृत्वा प्रणामं देवेशं सर्वान्कामानवाप्नुयात्॥
पशोः पशुपतेर्मध्ये दण्डवत्प्रणमन्ति ये।
६७ पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति पुनः सह॥

शैवे - सकृद्द्वारनमस्कारो मानेव प्रतिपद्यते।

स्कान्दे - दण्डप्रणामं कुर्वीत चेतसा निर्मलेन च॥
अष्टाङ्गं नापि पञ्चाङ्गं द्वयोरेकं समाश्रयेत्॥
दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा तथा (दृशा)।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥
बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥
दण्डप्रणामं यः कुर्यात् देवदेवस्य सन्निधौ।
वर्षाणि वसते स्वर्गे देहान्ते रेणुसंख्यया॥

॥इति श्रीशदेव विरचिते शिवामृतसारसमुच्चये दण्डप्रणाम
फलकथनं नाम त्रिंशं प्रकरणम्॥

— x —

अथ विश्वादि नाना फलमाह - महाभारते —

श्रीकृष्णवचनम् - शास्ते कुशाचितं शम्भोर्लोके न्यासोऽद्य कारकम्।

In Public domain. Digitization Muthulakshmi Research Academy

तथा - अर्थशास्त्रमधीयाना मृत्युना पाशसङ्कुताः।
शिवशास्त्रे तु ये युक्तास्ते तरन्ति महार्णवम्॥
शिवधर्मोत्तरे - यावदक्षरसंख्यातं शिवशास्त्रेषु पुस्तकम्।
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत्॥
तथा - सान्तःपुरं परीवारः सर्वैर्भृत्यैः समन्वितः।
68 दिव्यं शिवपुरं गच्छेत् विद्यादानप्रभावतः॥
नन्दिपुराणे - विद्यादानात् परं दानं न भूतं (नास्ति) क्रतुशतैरपि।
विद्यादानप्रदानेन बृहस्पतिपदं व्रजेत्॥
अग्निष्टोमस्य यज्ञस्य श्रौतस्याग्निकृतस्य च।
सहस्रसंख्याधिकं पुण्यं विद्यादानमनुत्तमम्॥
पुस्तकस्य च दानं च विशेषेण समुद्धृतम्।
लक्षं लक्षाधिकं पुण्यं विद्यादानान्न संशयः॥
(च) रथनस्य यज्ञस्य वाजपेयकृतस्य च।
न तत्फलं समाख्यातं यत्फलं पुस्तकस्य च॥
चतुःसागरपर्यन्तां यो दद्याद्वै वसुन्धराम्।
रत्नपूर्णां द्विजाग्र्याय न तत्फलमवाप्नुयात्॥
विद्यायाः सर्वशोभोऽयं पुराणैः परिकीर्तितम्।
विद्यादानप्रदानेन बृहस्पतिपदं व्रजेत्॥
योगिनो यां गतिं यान्ति वीतरागा विकल्मषाः।
तस्मात्परं यान्ति पदं पुराणं यः प्रयच्छति॥
तथा - कृत्तिवासपुराणं यो लिख्यते पाठयेत्सकृत्।
असहः सर्वसत्त्वेषु वंशवृद्धिश्च जायते॥
जीवन्निह कृतार्थः स्यात् सर्वतीर्थफलानि च।
देवाः पुनस्तामिच्छन्ति मृतः स्वर्गे महीयते॥
परिपालयतो नित्यं वागङ्गविकरोऽपि।
69 स्वकेशमुद्धृतं तेन शङ्करः परितुष्यति॥
नानाधर्मफलम्। शिवधर्मे
सर्वेषामेव पात्राणां मतिपातो महेश्वरः।
पतनात् त्रायते यस्माद्दत्तो वै नरकार्णवात्॥
यदिष्टं च विशिष्टं च न्यायेन समुपार्जितम्।
तच्छिवाय निवेदयेत् स्यात् भक्तानन्तफलार्थिभिः॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्य पात्रस्य माहात्म्यं दानं भवति चाक्षयम् ।

प्रथमतो लिङ्गदानं, बृहन्नारदीये —

ब्रह्माण्डकोटिदानेन यत्फलं लभते नरः ।

तत्फलं समवाप्नोति शिवलिङ्गप्रदानतः ॥

मम

स्कान्दे - शिववाक्यम् - काञ्चनं त्रुटिमात्रं वा यो दद्यान्मस्तकान्तले ।

तस्य दैवतेऽहं ददामि गृहमुत्तमम् ॥

शिवरहस्ये - सुवर्णैः कुसुमैर्दिव्यैः पिण्डहेमविनिर्मितैः ।

चिन्तयन्ति शिवं भक्त्या नरास्ते स्युर्महेश्वराः ॥

शिवपुराणे - शिववाक्यम् —

यस्तु गां च सुवर्णं च मामुद्दिश्य ददेन्नरः ।

स तु प्राप्य पुण्यं पूर्वं सायुज्यं निरुपद्रवम् ॥

कालोत्तरे - कटककङ्कणहारादि नानारत्नविभूषणम् ।

येऽर्चयन्ति महेशानं न तेषां पुनरुद्भवः ॥ पुनरुद्भवः ॥

भविष्ये - त्रुटिमात्रं च यो दद्यात् हेम लिङ्गस्य मूर्धनि ।

70 इन्द्रस्यार्धासने तावत् यावदिन्द्राश्चतुर्दश ॥

मौक्तिकत्रुटिदानेन स्वर्णदानमनन्तकम् ॥

शिवधर्मे - फलं कोटिसुवर्णस्य यो दद्याद्वेदपारगे ।

शिवेऽपि शैलमात्रेण तस्य पुण्यं ततोऽधिकम् ॥

ताम्रमृत्पात्रयोः काञ्चनरजतपात्रदानं समफलम् ॥

स्कान्दे - वासांसि सुपवित्राणि सारवन्ति मृदूनि च ।

धूपितानि शिवे दत्त्वा कैलाशानि नवानि च ॥

यावन्ति वस्त्रतन्तूनां परिमाणं विधीयते ।

तावद्युगसहस्राणि रुद्रलोके महीयते ॥

भविष्ये - त्रिवृतं शिवपात्रं च पट्टसूत्रसुनिर्मलम् ।

(लो) यज्ञोपवीतं रुद्राय भवेद्वेदान्तगः शुचिः ॥

कृत्वा यो दक्षिणां दत्त्वा सूत्रवस्त्रादिकालिकताम् ।

यः कृत्वा सकृद्देवं चातुर्मास्ये पवित्रकम् ॥

कल्पकोटिशतं साग्रं शिवलोके महीयते ॥

चातुर्मास्यो ~~श्र~~ श्रावणपौर्णमास्याम् ।

तथा - आ लिङ्गाद्वेदिपर्यन्तं यो दद्याद् घृतकम्बलम् ।

घृतेन स्नपकेऽभ्यङ्गं माघ्यां शम्भोर्महात्मनः ॥

मन्वन्तरशतं साग्रं शिवलोके महीयते ॥

In Public domain. Digitization Muthulakshmi Research Academy

RS125

माघ्यां मकरसङ्क्रान्तीयर्थे। तथा —

शिवस्य पुरतो दत्वा दर्पणं च सुनिर्मलम्।

71 दशकोटिसहस्राणि रुद्रलोके महीयते॥

शिवधर्मे — .... देव ~~देवेशाय~~ रुद्राय कालरुद्रमहेश्वरम्।

भविष्ये — चामरं यः शिवे दद्यात् मणिदण्डविभूषितम्।

हेमरौप्यादिदण्डाभ्यां तस्य पुण्यफलं शृणु॥

चामरासक्तदण्डाग्र दिव्यस्त्री परिवारितः।

महारत्नविमानस्थः शिवपुरं व्रजेत्॥

शिवरहस्ये - दीपिका धूपदहनं घण्टा घातार्घपताकाः।

चातुर्मास्य कुम्भानि दिव्यानि कुसुमानि च॥

सप्तलोकेश्वरास्ते स्युः ये प्रयच्छन्ति शङ्करे।

शिवधर्मे - महानाम महासन्दत्वा शङ्खयुग्मं शिवालये।

युगकोटिसहस्राणि शिवलोके महीयते॥

भेरी मृदङ्ग मुरली तिमिलापटहादीनि।

वंशकांस्यादिवाद्यानि यः शिवाय निवेदयेत्।

सर्वमानैर्महाभोगैः वंशवीणाकृतैर्वरैः।

युगायुगशतं साग्रं शिवलोके महीयते॥

स्तोत्रं तु सङ्गीतदानेन संगतेन विशेषतः

यक्षेन्द्रमैश्वरे लोके मोदते कल्पमक्षयम्॥

स्त्रावि नीताञ्जितं दास्यो भक्त्या वा निवेदयेत्॥

नरमेधस्य यज्ञस्य फलमष्टगुणं लभेत्॥

तथा — दद्यात्कुम्भमयूरं वा शिवायातीवशोभनम्।

72 सप्तद्वीपां क्षितिं दत्वा यत्फलं तदवाप्नुयात्॥

स्नानादिकार्यमुद्दिश्य सुरभिं च पयस्विनीम्।

गावश्च कपिलां दत्वा फलं भवति संशतम्॥ ?

स्कान्दे — गां पयस्विनीं दत्वा तरुणां वृषसंयुताम्।

शिवाय तेन दत्तं स्याज्जगत्सर्वं चराचरम्॥

शिवधर्मे — वृषभं धीरधूर्याङ्गमुदारं च शशिप्रभम्।

गोपतिं नीलवर्णं च यश्चेष्टं शिवे निवेदयेत्॥

यावन्ति देहे रोमाणि तत्पशोस्तत्कुलैः सह।

In Public domain. Digitization Muthulakshmi Research Academy

तावद्युगसहस्राणि रुद्रलोके महीयते।

तथा च ब्रह्मपुराणे- गयामाहात्म्ये-

एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
प्रक्षालयेच्चतुष्पादः गात्रः प्रक्षालितस्तथा।
ललाटे चन्द्रशाकल्यं वर्णेन नीलपाटलः॥
नीलो वृषः स विज्ञेयो शिवस्य वल्लभः सदा॥
यथोक्तविधिना यस्तु उद्दिश्य पितरं नरः।
पितॄन्वा गतिस्थांश्च तारयत्येकविंशतिः॥

बृहन्नारदीये - कार्तिक्यां पौर्णमास्यां वा आषाढे वापि भूपते।
वृषभं शिवतुष्ट्यर्थमुत्सृष्टानां फलं शृणु॥
सप्तजन्मार्जितैः पापैर्विमुक्तो रुद्ररूपवान्।
73 कुलसप्ततिसंयुक्तः रुद्रेण सह मोदते।
शिवलिङ्गाङ्कितं कृत्वा वृषभं यः समुत्सृजेत्।
न तस्य यातनालोकदर्शनं भवति प्रभो॥

शिवधर्मे - दश गावश्च वृषभा वृषभैकादश स्थिताः।
शिवाय विनिवेद्यैनं विरक्तेनान्तरात्मना॥
रुद्रैकादश तुल्योऽसौ बहुभोगादिभिर्गुणैः।
शिवादिसर्वलोकेषु यथेष्टं मोदते वशी॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
(भुक्त्वा) भुक्तान्स विपुलान्भोगान्पितृभिः कुलजैः सह।
तदन्ते ज्ञानमासाद्य प्रसादात्परमेष्ठिनः॥
विमुच्य मो(ह)कलिलं वस्वामन्ये वा नीतिष्ठते।

संयुक्तो भवतीत्यर्थः। स्कान्दे शिवमाहात्म्ये।
गोचर्मद्वयमात्रं वा यो भूमे दद्यात्सुरेश्वराय।
स भूपुरुषमासाद्य गणेशैः (शैः) सह मोदते॥
ग्रामपट्टकमानकं मानकं क्षेत्रं विजयादिनिवेदयेत्॥?
सर्वसस्यफलोपेतं सर्वबाधाविवर्जितम्।
यावं शिवाय यो दद्यात् तस्य पुण्यफलं शृणु॥
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।
सर्वदानेषु यत्पुण्यं ग्रामदानेन तत्फलम्॥

In Public domain. Digitization Muthulakshmi Research Academy

सूर्यकोटिप्रकाशैश्च दिव्यस्त्रीकोटिसंयुतैः ।
74 संयुक्तः कोटिशो लोकैः सर्वकामसमन्वितैः ॥
विमाने ग्रामदानेन त्रिंशतः कुलसंयुतः ।
याति माहेश्वरे लोके क्रीडते कालमक्षयम् ॥
पुण्यं नगरदानस्य ग्रामदानशताधिकम् ।
देशदानेन चानन्त्यमस्माकं तत्प्रकीर्तितम् ॥
शिवरहस्ये — शय्यभोज्यैः :—
शय्यां तूलीसमायुक्तां मृदुरत्नद्वामलंकृताम् ।
सर्वोपकरणोपेतं शिवशक्ति प्रकल्पयेत् ॥
संपूज्य गन्धपुष्पाद्यैर्वस्त्रालंकारचामरैः ।
अद्य भोज्यैश्शोभैस्तु ततः शय्यां निवेदयेत् ॥
तन्तूनां तुल्यवस्त्राणां परिसंख्यातया समाः ।
तावदब्दसहस्राणि रुद्रलोके महीयते ॥
क्रमादायाति लोकेऽस्मिन् सिंहासनगतिर्भवेत् ॥
भविष्यपुराणे — यः प्रदद्यात्कूलादामयुतां महाघण्टां महास्वनाम् ।
कांस्यलोहयुतं वाऽपि निवेदयति शिवालये ॥
घण्टां कर्णगतः श्रीमान् शिवस्यातीवशोभनम् (नाद) ।
तस्य तुल्यो भवत्को भूत्वा शिवलोके वसेच्चिरम् ॥
छत्रं पताका नियतं शोभां कृत्वा ददाति यः ।
सोऽपि द्वीपपतिर्भूत्वा रविवत्तेजसा भुवि ॥
शिवधर्मे — ~~शिव~~ वितानं शिवपद्माभं मद्येकमलभूषितम् ।
75 विचित्रमेकवर्णं वा नववस्त्रोपशोभितम् ।
किङ्किणीरवकोपेतं कन्दुकैरुपशोभितम् ॥
लाम्बितैश्च मुक्ताहारैश्च घण्टाचामरशोभितम् ।
शिवस्योपरि यो दद्यात् परितो वापि कल्पयेत् ।
रुद्रवत्सर्वलोकेषु युगकोटिं स मोदते ॥
उमासंवादे — ध्वजं ददाति यः काष्ठे संघृतं तु शिवालये ।
दण्डेन परिवर्तेन गोसहस्रफलं लभेत् ॥
भविष्ये — श्वेतं महाध्वजं दत्त्वा रथ्यां पीतं तु रक्तकम् ।
किङ्किणीरवकोपेतं मयूरच्छत्रशोभितम् ॥
याते वैश्च विमानेन सर्वदेवोपरिरक्षितः ।

In Public domain. Digitization Muthulakshmi Research Academy

मन्वन्तर सहस्रैकं मोदते दिवि रुद्रवत्॥

शिवधर्मे - शिवस्योपरि योदद्यात् सर्वरत्नोपशोभितम्।
मण्डलं मौक्तिकं श्रीमान् तस्य पुण्यफलं शृणु॥
कोटि कोटि विमानेन सर्वकामसमन्वितः।
आभूतसंप्लवं यावत् वासते शिवपुरे सुखी॥
गजाश्वरथदोलादि दानं फलमनन्तकम्॥

इति श्रीशैवेन विरचिते शिवामृतसारसमुच्चये विद्यादिदान
फलं नाम त्रिंश प्रकरणम्॥

—*—

76 अथ चतुर्दश्यादिव्रतफलमाह- तत्राकरणे दोषाः स्नूयन्ते

पाद्मे - परात्परतरं नास्ति शिवरात्रि व्रतात्परम्।
नाराधयति भूतेशं रुद्रं त्रिभुवनेश्वरम्॥
जन्तुर्जन्मसहस्रेण भ्रमन्ते नात्र संशयः॥

स्कान्तथैव पठता॥ वर्षे वर्षे च मे देवि नरो नारी पतिव्रता।
शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत्॥

'निष्फलशब्दोऽपि तत्रैव।
माघ कृष्ण चतुर्दश्यां यः शिवं संशितव्रतः।
मुमुक्षुः पूजयेन्नित्यं स लभेदिप्सितं फलम्॥
अर्णवोपि कदा रुध्येत् क्षाते यः मघवापि।
मेरुमन्दरलङ्काश्च श्रीशैलो विन्ध्य एव च॥
चलमेके कदाचित्तु निष्फलं हि शिवव्रतम्॥

काम्यं च फलश्रवणात् अवगम्यते। स्कान्दे -
शिवं संपूजयित्वा वै यो जागर्ति चतुर्दशीम्।
मातुः पयोधररसं न पिबेत्स कदाचन॥

यदीच्छेद यदि स इच्छया ल्लोकान् शिवसायुज्यमाप्नुयात्॥

सत्यखण्डे - एवं च लिङ्गमभ्यर्च्य सोपवासः सजागरः।
अजानन्नपि च निष्पापो निपादो ---- पि च॥?

77 स्कान्दे - अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत्।
सर्वान्कामानवाप्नोति रुद्रेण सह मोदते॥

केवलजागरणमाह-
कश्चिद्व्रत विरोधेन व्रतहीनोऽपि यः पुमान्।
जागरं कुरुते तत्र स रुद्रसमतां व्रजेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

स्कान्दे- गङ्गा गया कुरुक्षेत्रं नैमिषं पुष्कराणि च।
स्नातेषां फलमाप्नोति शिवरात्रौ तु जागरे॥
जागरं नृत्तगीताद्यैः स कृत्वा तु यः शङ्करम्।
मन्वन्तरं शतं साग्रं शिवलोके वसेत्सुखी॥

स्कान्दे- याम्यद्दन्यापि वा शिवरात्रि चतुर्दशीं शिवभक्तः करोति
निशि जागरणामीशम्। देवेश विष्णु चतुरानन षण्मु-
खाद्याः पुण्येन तस्य सकलं प्रतिवक्तुमीशाः॥

कैवल्यपूजामाह- ईशानसंहितायाम्—
शिवरात्रि व्रतं नाम सहितं . . . . ।
एव चण्डाल मनुष्याणां भुक्तिमुक्तिप्रदायकम्॥
यस्यां यमपूजयेदीशं सर्वपापप्रणाशनम्॥

स्कान्दे- यः पूजयति सर्वं भक्त्या मूलेन सप्ततां व्रजेत्।
उपवासे स्वशक्त्या पूजा जागरणेनयेत्॥
भूतेश्वरादिह परोऽस्ति न पूजनीयो
नैश्वा एव मेव सदृशः क्रतुरस्ति तावत्।
78 गङ्गा समं त्रिभुवने न च तीर्थमस्ति
नान्यद्व्रतं शिवरात्रिसमं तथास्ति॥

आग्नेयपुराणे- नमस्कारैर्महादेवं नृत्तगीतैश्च तोषयेत्।
भूताय पारणं देवि कुलानां शतमुद्धरेत्॥
अतिथिचन्द्रिकामाह- अनन्तभट्टटीकायाम्—
प्रदोषव्यापिनी ग्राह्या शिवरात्रिः शिवप्रिये।
रात्रौ जागरणं यस्मात् तस्मात्तां समुपोषयेत्॥

कालादर्शे -कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रि चतुर्दशी।
एताः पूर्वयुता ग्राह्यास्तिथ्यन्ते पारणं भवेत्॥

वायुपुराणे- त्रयोदश्यस्तगे सूर्ये चतुर्ष्वेव नाडिषु।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्॥
एतन्माधविकारेण कृतम्। ईशानसंहितायाम्—
अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्।
शिवरात्रि व्रतं तत्र कुर्याच्चैव ~~x~~ चतुर्दशीम्॥

नारदीये- अर्धरात्रियुता यत्र सिता कृष्णचतुर्दशी।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत्॥

स्मृत्यन्तरे- भवेद्यत्र ~~चतुर्दश्यां~~ त्रयोदश्यां भूतव्याप्ति महानिशि।

शिवरात्रिव्रतं तत्र कुर्याज्जागरणं निशि ॥

पद्मपुराणे — ईशानसंहितायाम्

प्रदोषे निशीथे वा द्वयोर्वा यातु मा भवेत् ।

शिवरात्रिव्रते तद्वद्द्वयोः सन्ना प्रशस्यते ॥

(निशीथैव) तदभावे त्रानिशीथैव व्यापिका परिगृह्यताम् ॥

तत्रस्या च लिंगभवेत्सा सा प्रदोषव्यापिनी तिथिः ॥

न यदा पूर्वविद्धायां . . .

उपवासस्तथा पूर्वेद्युः किं तिथ्यन्ते पारणं तिथिमध्ये

मां पक्षन्तु पक्षद्वयमेव । तिथ्यन्ते पारणं पूर्वमुदाहृतम् ।

तथा च शैवे — त्रयोदश्यां यदा रात्रौ यामभेकं चतुर्दशी ।

उपोषणस्या महापुण्या शम्भोर्वै जनमप्रीता ॥

महतामपि पापानां दृष्ट्वा च निष्कृतिः कृता ।

न दृष्टा कुर्वतां पुण्यं शिवरात्रिकुहू युता ॥

तिथीनामेव सर्वासामुपवासव्रतादिषु ।

तिथ्यन्ते पारणं चैव पूर्वकमनुदाहृतम् ॥

तथा च शैवे — कुर्याद्दिनाशिव चतुर्दशीम् ।

उमां प्रति शिववाक्यम् — चतुर्दश्यामुपोष्यैव चतुर्दश्यां तु पारणम् ।

शिष्टे शिष्टे फलं तस्य न जाने त्वं वरानने ॥

माधविकारे — तिथ्यन्ते पारणं तत्र यामत्रयसमागमे ।

अन्यथा पारणं प्रातरन्य तिथ्युपवासवत् ॥

४० अथ व्रतविधिमाह स्कान्दे —

मघायां मूलयोर्मध्ये चतुर्दश्यां निशागमे ।

शिवरात्रीति विख्याता भुक्तिमुक्तिफलप्रदा ॥

चतुर्दश्यां निराहारः स्थित्वा चैवापरेऽहनि ।

भोक्ष्ये त्वन्तु विरूपाक्ष शरणं मे सदा शिव ॥ भव ।

प्रातर्देव चतुर्दश्यां जागरेण महानिशाम् ।

पूजां होमं जपं दानं करिष्याम्यात्मशक्तितः ॥

षडक्षरेण मन्त्रेण महादेवं प्रपूजयेत् ।

बिल्वपत्रैश्च नैवेद्यैः बहुरसैश्च निवेदयेत् ॥

अथ प्रथमप्रहरार्घ्यमन्त्रमाह —

भवदारिद्र्यदुःखौघदग्धोऽहं पार्वतीप्रिय ।

गृहाणार्घ्यमुमानाथ . . . त्वं प्रसीद मे ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रार्थना — शिवरात्रौ ददाम्यर्घ्यं सर्वपापव्यपोहनम्।
शिव प्रयच्छ मे भक्त्या प्रसीद उमासख॥
द्वितीयप्रहरार्घ्यमन्त्रमाह—
नमः शिवाय शान्ताय कारणत्रयहेतवे।
शिवरात्रौ ददाम्यर्घ्यं भक्त्या तुभ्यं महाप्रभो॥
प्रार्थना— न्यूनं कामातिरेकं वापि हीनं वापि मया कृतम्।
४। तदस्तु सर्वं सम्पूर्णं शिवरात्रौ कृतं मया॥
तृतीयप्रहरार्घ्यमन्त्रमाह—
मया कृतान्यनेकानि पापानि हर शंकर।
गृहाणार्घ्यं महेशान भक्त्या नित्यं मया प्रभो॥ नम
प्रार्थना— अत्रान्यत्तु महादेव शिवरात्रौ कृतं मया।
तदस्तु सर्वं संपूर्णं त्वत्प्रसादात्सुरेश्वर॥
चतुर्थप्रहरार्घ्यमन्त्रमाह—
तोयं पुष्पं फलं चैव चन्दनं सर्पिषैः सह।
शिवरात्रौ ददाम्यर्घ्यं भक्त्या सर्वपुरस्सरम्॥
प्रार्थना— अविघ्नेन व्रतं देव त्वत्प्रसादात्समार्जितम्।
समस्त जगतां नाथ त्रैलोक्यपतिहर॥
मूलमन्त्रेण होतव्यं तिलेनाष्टोत्तरं शतम्।
पञ्चामृताद्यैः पूजां च यामे यामे च कारयेत्॥
नृत्यगीतादिकं वाद्यं यामे यामे च कारयेत्।
ततः प्रभाते संजाते नमस्कृत्य क्षमापयेत्॥
यन्मया सुकृतं पुण्यं त्वत्प्रसादात्सुरेश्वर।
स्वसामर्थ्यानुसारेण कर्तव्यं भोजयमादरात्॥
दक्षिणावस्त्रगन्धाद्यैराचार्यं च प्रपूजयेत्।
अन्यानपि द्विजश्रेष्ठान् यथाशक्त्या प्रपूजयेत्॥
ततः प्रदक्षिणं कृत्वा नमस्कृत्य क्षमापयेत्॥ क्षमापयेत्॥
४२ स्मृत्यन्तरे— पूजयित्वा शिवं शान्तं त्रयोदश्यां यथाविधि।
शिवस्य पुरतो वापि प्रतिज्ञां कारयेत्सुधीः॥
तद्यथा— प्रातर्देव चतुर्दश्यां जागरिष्याम्यहर्निशम्।
पूजां दानं जपं होमं करिष्यात्मशक्तितः॥
ततः प्रभातसमये नित्यकृत्यसमाहितः।
आचार्यमाहूत शिष्टं सत्यशौर्यदयान्वितः॥

In Public domain. Digitization Muthulakshmi Research Academy

पश्चाद्दस्तं गते भानौ प्रविश्य यागमन्दिरम्।
पूर्वां पूजां विसृज्याथ नीरक्षीरघृतादिभिः॥
स्नापयेल्लिङ्गमेकान्ते तत्र पूजां समाचरेत्।
द्वारपालं गणेशञ्च गुरुनाथ दिगीश्वरान्।
ततः पुष्पैश्च विविधैः गन्धमाल्यानुलेपनैः।
धूपादार्तिघण्टाभिः दिग्[शां] पालोपशोभितैः॥
शर्करा क्षीर दध्यन्न खण्डलड्डुकमोदकैः।
अन्यैश्च फलमूलाद्यैः नैवेद्यैस्तु मनोहरैः॥
सुसूक्ष्माणि च वस्त्राणि निवेद्य ~~सूक्ष्मे~~ गुरुदेवयोः।
अनेन विधिना सम्यक् पूजयित्वा महेश्वरम्।
होमकुण्डं समासाद्य शिवमन्त्रेण होमयेत्॥
तिलतण्डुलव्रीहिश्च चरुं कृत्वा विशेषतः।
दत्वा पूर्णाहुतिं चैव तत्र देवांश्च प्रार्थयेत्॥
८३ हर शङ्कर देवेश व्रतानां फलदायक।
शिवरात्रिव्रतं देव कृतं मे त्वत्प्रसादतः॥

अथ शैवाग्निसंस्कारमाह—

कुण्डस्य उपलेपनम् मूलेन वीक्षणम् अस्त्रेण प्रोक्षणं
मूलेन हुं फट् मन्त्रेण कुशैस्ताडनम्। अग्निमानीय
मूलमन्त्रेण वीक्षणम्। अस्त्रेण प्रोक्षणम्। हुं फट् मन्त्रेण
ताडनम्। राक्षसांशपरित्यागः। पुनरभ्युक्षणम्। त्रिःप्रद
क्षिणीकृत्य शिवबीजमिति ध्यात्वा प्र[वा]तावेन स्थापनम्।
वह्निमूर्तये नमः इति इति स्थापनम्। औदर्यैव
ऊनी लौकिकाग्निनामेकत्वचिन्तनम्। पञ्चब्रह्ममन्त्रैः पूजनम्।
मूलेन सकूर्चजलेन प्रणीतापूजनम्। गन्धपुष्पदानम्
अस्त्रमन्त्रेण रक्षसां संस्थापनम् वामभागे वह्निरास्तरणम्
आज्यस्थालीमाज्येन पूरयित्वा वामभागे स्थापनम्।
पवित्रकरणम्। हृदयमन्त्रेणोत्पवनम्। अस्त्रेण प्रोक्षणम्
हृतमुद्राभ्यां गृह्य नाभि काश्मा कुशैः हुत्वा अस्त्रेण प्लाव
नम्। मूलेन पञ्चाहुतिदानम्। प्रणवादि हृदयमन्त्रेण

In Public domain. Digitization Muthulakshmi Research Academy

शैवाग्निं स्व विन्यसेत्। परिधि विष्टरदानम्॥ एकाग्रे

८४ दुग्धेन दधिना चैव सर्पिषा मधुना तथा।

खण्डेन चैव देवेशि महास्नानं च कारयेत्॥

क्षीरेण तत्पुरुषवक्त्रं मघोरं दधिना तथा।

सद्यो जातं घृतेनैव मधुना वामदेवेन च॥

खण्डेन स्या नाम ~~स्नुन्मं~~ स्नंतु स्नाप्य लिङ्गं प्रपूजयेत्।

स्नानं शत फलं तोय मभ्यङ्गं पञ्च विंशतिः॥

फलानां द्वि सहस्रेतु महास्नानं प्रकीर्तितम्।

पयो दधि घृतं क्षौद्रं खण्डानां द्वि सहस्रकम्॥

महास्नान फलानान्तु फलानामपि तत्समम्।

तक्कोल जातिपुन्नाग श्री फला म्बुजैरेव च॥

प्रत्येकं द्वि सहस्रेण स्नापये त्परमेश्वरम्।

महास्नाने प्रसक्तेतु स्नान मष्टविधं स्मृतम्॥

स्वच्छं हैमं सुगन्धं च सरत्नं फल पुष्पकम्।

सर्वौषधि युतं चान्यत् स्नाने स्वाद्यो ~~निरोधतः~~ निरोधतः॥

आगमोक्तेन विधिना तत्कर्म च इहोच्यते।

आदौ द्रव्यस्य संस्कारं सङ्कल्प करणं तथा॥ ततः।

स्नान मण्टपनयनं देवताया स्ततो भवेत्॥

गीत नृत्तादि करणं महा वर्त स्ततो भवेत्।

स्वधूपै मोदकरणं दीपवृक्षस्य रोपणम्।

ततः प्रदीपदानं स्यात् पुरतः स्थापनं तथा॥

८५ कुम्भानुदक पूर्णांश्च पञ्च पल्लव शोभितान्।

पञ्चोपचार पूजा स्याद्यभ्यर्चन मतः परम्॥

स्नान मुद्वर्तनं स्नान मुद्वर्तन विधि स्ततः।

शुद्धा मलकदानं च स्नानं शुद्धोदकै स्तथा॥

संस्कृत्य क्षीरदानं स्नपन मथ दधि स्नान माज्यं तथांते

स्नानं मद्वा स्नपन मथ तथा स्नान दाना भिषेकौ॥

... स्नानं नारिकेलं जल मथ निविष्टं गोधूमं स्वर्ण चूर्णं

शुद्धाम्भः पुष्प गन्धामलक महोत्रा सुशीतां कुशाम्भः॥

In Public domain. Digitization Muthulakshmi Research Academy

R 5125

इक्षुभिर्नवनीतचूर्णैः सलिलमधुसुगन्धिप्रलेपाभिषेकैः।
श्रीकण्ठादभ्युदानं पुनरपि दशधा वारिदानं ततोऽन्त॥

अथ विशेषतश्चतुर्दशीव्रतमाह - भविष्ये -

चतुर्दश्यां तथाष्टम्यां पक्षयोः कृष्णशुक्लयोः।
योऽब्दमेकं न भुञ्जीत शिवार्चनरतः सदा॥
तत्पुण्यमक्षयं प्रोक्तं सततं शक्रयाचितम्।
सत्यवादिषु यत्पुण्यं यत्पुण्यं क्रतुयाजिनाम्॥
अग्निहोत्रेषु यत्पुण्यं यत्पुण्यं यज्ञयाजिनाम्।
तत्पुण्यं सकलं तस्य शिवलोकं स गच्छति॥

46 लिङ्गे, शिववाक्यम् -
उपवासश्चतुर्दश्यां महापातकनाशनम्।
नक्तं कृष्णचतुर्दश्यां तथा कृष्णाष्टमीषु च।
इह भोगानवाप्नोति परत्र च सुखां गतिः॥
सर्वलोलाक्रमं नक्तं भुक्तमन्नोदनम्॥

स्मृतिः:- कुहूसंक्रमणे रात्रौ चतुर्दश्यष्टमी तथा।
एकादश्यां दिवारात्रौ भुञ्जानो नरकं व्रजेत्॥

कालिकापुराणे - लिङ्गार्चनं रुद्रजपो व्रतं शिवदिने तथा।
वाराणस्यां च मरणं मुक्तिरेषा चतुर्विधा॥
एकादश्यष्टमी चैव चतुर्दशी शिवप्रिया।
अमावास्यामुपवसेद्द्विजो नान्यस्तथा द्वयोः॥

बृहन्नन्दिकेश्वरे -
शिवे दशगुणं दानं श्रोत्रिये दशधा भवेत्। (शतधा)
सहस्रगुणमाचार्ये अनन्तं शिवयोगिनि॥
अमावास्यामनुप्राप्य ब्राह्मणाय तपस्विने।
यत्किञ्चिद्दीयते देवि वशी दयाक्षौ द्विरश्वशङ्करम्॥

शुक्लचतुर्दशी परोपेता कृष्णा पूर्वेति व्यासः।
शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते॥

47 तथा च निगमे पठ्यते - शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥
एवमेव ज्ञातव्यम्॥

॥ इति श्रीशदेवविरचिते शिवामृतसारसमुच्चये शिवरात्रि-चतुर्दशी उपवासादि फलकथनं नामैकत्रिंशं प्रकरणम्॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ पवर्गादि फलकथनम् - तथा चागमे -

वंशांकुरोत्थं वंशार्थी गोमयं सर्वरोगहम् ।
केशास्थिसंभवं लिङ्गं सर्वशत्रुविनाशनम् ॥
मारूरं लवणोत्थं च सर्वलोकवशंकरम् ।
स्तम्भने रजनीपिष्टसंभवं लिङ्गमुत्तमम् ॥
तण्डुलोद्भवपिष्टोत्थं लिङ्गं साम्राज्यदायकम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्तिलक्ष्मीसुखप्रदम् ।
धान्यजं धान्यदं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुष्पोत्थे .. फलदं तादृशं फलदं मतम् ।
नवनीतोद्भवं लिङ्गं कीर्तिसाम्राज्यवर्धनम् ॥
अपमृत्युनिवारणम् ।
दूर्वायांसम्भूतलिङ्गं ~~उच्चाटनकरं भवेत्~~ ।
प्लक्षवृक्षोद्भवं लिङ्गमुच्चाटनकरं भवेत् ॥
44 आगमोक्तविधानं तु ज्ञात्वा सम्यग्विचक्षणः ।
वस्तुमात्रस्य कुर्वीत लिङ्गं तत्तत्फलाप्तये ॥
अक्षादलप्रमाणं तु लिंगं लिंगज्ञ द्रव बुधः ।
कुर्वीत कुल्लितो ह्रस्वं न कदाचिल्लभाचरेत् ॥

अङ्कस्य मानकथनम् -

अतिविस्तृतं लिङ्गं स्फाटिकं सर्वकामदम् ।
नर्मदासेवितश्रेष्ठं वान्यं वापि लिङ्गकं वान ॥ २
कृत्वा तु पूजयेद्विद्वान् नियतं प्राप्नुयात्फलम् ।
कन्यार्थी शतत्रयम्
विद्यार्थी लिङ्गसाहस्रं ~~भुक्तिकामस्सहस्रकम्~~ ॥
मोक्षार्थी कोटिसाहस्रं भुक्तिकामस्सहस्रकम् ।
मारणार्थी सप्तशतं मोहनार्थी शताष्टकम् ।
उच्चाटने पुरश्चैव सहस्रं लिङ्गमर्चयेत् ॥
महाराजभये चैव पञ्चशतं राष्ट्रसंकटे ।
शत्रुघ्नं च डाकिन्यां भये पञ्चशतं परम् ॥
दारिद्र्ये पञ्चसाहस्रं अयुतं सर्वकामदम् ।
लिङ्गानामयुतं कृत्वा महाराजभयं हरेत् ।
सहस्रमेकं लिङ्गानां व्याधिनां रोगं ~~[illegible]~~ हरेत् ।
सहस्राणि तथा पञ्च निगडान्मुच्यते ध्रुवम् ।
कारागृहविमुक्त्यर्थं अयुतं पूजयेद्बुधः ।
पञ्चलिङ्गार्चनान्नित्यमतुलां श्रियमाप्नुयात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

लक्षमेकं तु लिङ्गानां यः करोति नरो भुवि।
शिवजालमवेल्लोऽपि नात्रकार्या विचारणा॥
अर्चा पार्थिवलिङ्गानां कोटियज्ञफलप्रदम्॥
लिङ्गे.— मृदाहरणसंघट्ट प्रतिष्ठाह्वानमेव च।
स्नपनं पूजनं चैव विसर्जनमतः परम्।
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।
पशुपतिः शिवश्चैव महादेव इति क्रमात्॥
आवरणस्थान सर्वादीन् पूजयेत्।
संपूज्य श्रीमहादेवं नैवेद्यं नैव भक्षयेत्।
शतपूजा विनश्यन्ति सद्यः पार्थिव सुविक्षितम्॥
हृत्वा दहति निर्माल्यं शिवस्य चरणोदकम्।
दहते सर्वपापानि तृणानीव विवह्निना॥ हलाशनः।
बाणलिङ्गे स्वयंभूते अर्च्ये चन्द्र रत्ननिर्मिते॥
अश्वमेधशतं पुण्यं शिवनिर्माल्यभक्षणात्।
अचलस्य च नैवेद्यं चलस्यापि महाफलम्॥
चलाचलस्य लिङ्गस्य निर्माल्यं नैव भक्षयेत्।
अन्यदत्तं तु नैवेद्यं यः खादति शिवस्य तु॥
सोऽपि कुक्कुरतां याति पार्थिवे हि सुनिश्चितम्।
लिङ्गे, न्ये देवपूजायां मन्यदेव दत्तमित्यर्थः॥

50 ॥इति श्रीमहादेव विरचिते शिवामृतसारसमुच्चये अपवर्गादिफल
कथनं नामैकत्रिंशं प्रकरणम्॥

— ※ —

अथ रुद्राक्ष विधान फलम्। शिवधर्मे
मृद्याचेष्टकशैलं वा यस्तु कुर्याच्छिवालयम्।
त्रिसप्तकुलसंयुक्तः रुद्रलोके महीयते॥
बृहन्नारदीये - देवतायतनं यस्तु कुरुते काष्ठेयादि।
शिवस्य नाहेशापि तस्य पुण्यफलं शृणु॥
मातृतः पितृतश्चैव शतकोटि(कु)लान्वितः।
कल्पत्रयं विष्णुपदे स्थित्वा तत्रैव लीयते॥
केवलमृन्मात्रेणेत्यर्थः।
दारुतः कुरुते यस्तु तदेव द्विगुणं फलम्।
इष्टकाभिस्त्रिगुणं शिलाभिश्च चतुर्गुणम्॥
स्फाटिकादिशिलाभिश्च स्वर्णं दशगुणोत्तरम्।
ताम्रैः शतगुणं रैप्यं हेम्ना कोटिगुणं भवेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

तथा च पद्मपुराणोत्तरखण्डे —

तृणैः काष्ठैश्च पाषाणैः ये कुर्वन्ति शिवालयम् ।

मोदन्ते सह रुद्रेण ते नराः शिवसन्निधौ ॥

९। शिवधर्मोत्तरे —

मृन्मयात् कोटिगुणितं फलं स्याद्दारुजैः कृतम् ।

कोटिकोटिगुणं पुण्यं दारुजादिष्टकालये ॥

इष्टकादिगुणं पुण्यं शैलेय स्याच्छिवालये ॥

इष्टं शृङ्गसमायुक्तं सोऽपि कुर्याच्छिवालयम् ।

विधूतपापसंघातं स गच्छेच्छङ्करालयम् ॥

शैवे — शङ्कुकर्णो यथा चायं महाकालोऽयमम्बिके ।

यथा नन्दीश्वरोऽयं मे तथा सोऽपि भविष्यति ॥

लिङ्गे — मन्दिरं योऽप्रकुर्वीत शिवाय विधिपूर्वकम् ।

भक्त्या वित्तानुसारेण तथा याम मद्यमान् ॥

आप्नोति फलमनन्तकम् । शिवधर्मे —

यावद् ... नि कुरुते धवलं तच्छिवालये ।

तावद्वर्षसहस्राणि शिवलोके महीयते ॥

॥ इति श्रीशादेवविरचिते शिवामृतसारसमुच्चये रुद्रस्या

प्रायतनविधानफलकथनं नाम

त्रयस्त्रिंशं प्रकरणम् ॥

— * —

अथ लिङ्गस्थापनफलमाह — लिङ्गपुराणे —

ब्रह्मादिस्थावरान्तं च सर्वं लिङ्गे प्रतिष्ठितम् ।

१२ तस्मात्सर्वं परित्यज्य स्थापयेल्लिङ्गमुत्तमम् ।

लिङ्गं देवी उमा देवी लिङ्गं साक्षान्महेश्वरम् ॥

प्रतिष्ठायां च देवेशि स्वा देव्याः सर्वं प्रतिष्ठितम् ॥ ?

य इदं स्थापयेल्लिङ्गं स एव परमेश्वरः ॥

भविष्ये — यो लिङ्गं स्थापयेदेकं विधिपूर्वं स्वदक्षिणम् ।

सम्यगागमोदितं पुण्यं कोटिकोटिगुणं भवेत् ॥

मातृजान् पितृजांश्चैव तस्मादुद्धरते शिवाश्रितान् ॥

कुलैकविंशमुत्तार्य शिवलोके महीयते ।

भुक्त्वा तु विपुलान् भोगान् प्रलये समुपस्थिते ।

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते॥

तथा च हयशीर्षे — यो लिङ्गं स्थापयेदेकं सम्यक् श्रद्धासमन्वितः।

न तस्य फलसम्प्राप्तिं वक्तुं शक्नोति केनचित्॥

यदि वक्त्रसहस्राणां सहस्राणि भवन्ति हि।

आयुष्मान् ब्रह्म तत्तुल्यं वक्तुं शक्नोति विस्तरम्॥

किं व्रतैर्बहुशो वत्स यदि वक्ष्यामि तच्छृणु।

सर्वयज्ञफलं प्राप्य सर्वतीर्थतपःफलम्॥

शिवलोके वसेद्धीमान् यावदाभूतसंप्लवम्॥

क्षीणे देहे स तत्रैव लीयते परमात्मनि॥

तस्य च महत्त्वेन ग्रन्थविशेष उक्तः।

९३ बाणलिङ्गे फलविशेषः — हयशीर्षे —

वैदिकेन विधानेन यावन्त्येव स्थापयेत्तु यः।

सहस्रमेकं लिङ्गानां प्रासादसन्तरे नरः॥

तत्फलं कोटिगुणितं बाणलिङ्गे विशेषितम्॥

मत्स्यसङ्ग्रहे - लिङ्गप्रतिष्ठानन्तरं च उक्तः

योगसाधको लिङ्गमाश्रयेत्।

प्राप्नोत्यभिमताल्लोकान् मोक्षार्थी मोक्षमाप्नुयात्॥

॥ इति श्रीशदेवविरचिते शिवामृतसारसङ्ग्रहे लिङ्ग

स्थापनफलकथनं नाम चतुर्दशं

प्रकरणम्॥

अथ तत्क्षेत्रतीर्थफलमाह स्कान्दे —

पञ्चक्रोशप्रमाणेषु शिवक्षेत्रेषु देहिनाम्।

मृतानामेकरूपत्वे पापिष्ठानां महेश्वरः॥

लिङ्गे — अर्धक्रोशं शिवक्षेत्रं शिवलिङ्गात्मकं ततः।

यस्मिन् प्राणपरित्यागे शिवसायुज्यमाप्नुयात्॥

स्वयंभोस्तथा मानं तथा बाणस्य सुव्रत।

स्वयंभुवे तदर्धं स्यात् आर्षके च तदर्धकम्॥

मानुषेऽपि तदर्धं स्यात् क्षेत्रमानं द्विजोत्तमाः॥

९५ शतं क्षितीनामपि च क्षेत्रमानं द्विजोत्तमाः।

अन्यत्र — लिङ्गे। त्रिशतं सार्धं शिवक्षेत्रं समन्ततः।

In Public domain. Digitization Muthulakshmi Research Academy

क्रोशमात्रं परं क्षेत्रं शिवस्य परमेष्ठिनः ॥
देहिनां तत्र पञ्चत्वं शिवसायुज्यकारणम् ।
मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं श्रुतम् ॥
स्वयंभुवे सहस्रं स्या दार्षेऽपि च तदर्धकम् ।
तस्मादावसथं कुर्यात् शिवक्षेत्रसमं ततः ॥
शिवधर्मे –
ग्रामे वा यदि वारण्ये जले वापि स्थलेऽपि वा ।
यत्रैव दृश्यते लिङ्गं सर्वतीर्थानि तत्र वै ॥
लिङ्गे – तस्मात् कोटिगुणं पुण्यं नित्ये ह्युत्क्रमात् ?
शैवे । शैवे ह्नशनेनैव व्रतेन परमेश्वरि ।
क्षेत्रसङ्कल्पमृत्युश्च शिवसायुज्यमाप्नुयात् ॥
शिवधर्मे – आरामं वापिकां कूपं तटाकं देवतागृहम् ।
शिवक्षेत्रेषु यः कुर्यात् सोऽनन्तफलमाप्नुयात् ॥
गृहे श्राद्धस्य यत्पुण्यं मरणे तच्छताधिकम् ।
शिवागमेषु निर्दिष्टं तत्पुण्यमयुताधिकम् ॥
अथ शिवगङ्गास्नानफलमाह – लिङ्गे –
शिवक्षेत्रसमीपस्था नद्यः सर्वा द्विजोत्तमाः ।
वापीकूपतटाकाद्याः शिवगङ्गा इति श्रुताः ॥
95 गङ्गास्नानसमं पुण्यं लभते नात्र संशयः ।
त्यजेद्देहं सकृद्यो वै शिवलोके महीयते ॥
त्रिकालं यो नरः स्नाति नात्र कार्या विचारणा ॥
भविष्ये –
शिवलिङ्गसमीपस्था नद्यः सर्वाश्च भारत ।
वापीकूपतटाकाद्याः शिवगङ्गा इति श्रुताः ॥
स्नात्वा तासु नरो भक्त्या शिवगङ्गासु मानव ।
ब्रह्महत्यादिभिः पापैः मुच्यते नात्र संशयः ॥
प्रातः स्नानान्मुनिश्रेष्ठाः शिवतीर्थेषु मानवाः ।
अश्वमेधफलं प्राप्य शिवलोकं स गच्छति ॥
शिवधर्मे — शिवक्षेत्रसमीपस्थं यत्तोयं पुरतः स्थितम् ।
शिवगङ्गेयमुक्तेयं तत्र स्नात्वा शिवं व्रजेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

शतानन्दसंग्रहे –

चैत्रकृष्णचतुर्दश्यां च स्नात्वा शिवसन्निधौ ।

गङ्गायां सर्वशोभं च फलं प्राप्नोति मानवः ॥

भौमवारे विशेषः । सह्याद्रिखण्डे –

चैत्रकृष्णचतुर्दश्यां मङ्गारकदिनं यदि ।

शिवालयं पुनर्दृश्य तीर्थेषु स्नानभोजनात् ॥

96 ॥ इति श्रीशदेवविरचिते शिवामृतसारसमुच्चये

तत्क्षेत्रतीर्थफलकथनं नाम

पञ्चत्रिंशप्रकरणम् ॥

—— ·×· ——

शुभम् ॥

copied by

S. Subramania Sastri

In Public domain. Digitization Muthulakshmi Research Academy